अष्टौ देव्यो(व्या?)ह्युभौ[15] पार्श्वे तार्क्ष्यपक्षेव्यवस्थितः ।
कीर्तिस्मृत्यम[16]मारोप्य शेषाः पक्षोपरिस्थिताः ॥ 27

---

1. तेजसं -H, 2. D पाठः, एष -B, एक -H, 3. पारिषदरुग्रैः - B. पार्षततोत्युच्चैः -H, 4. विनोदेन -B, 5. सगन्धर्वाप्सरसः -B, 6. धरानपि -D, 7. उत्सवं -C G, 8. C पाठः, वह्न्योश्च -B, वह्न्यौ -G, 9. B पाठः, अरे कराभ्यां पादेन -C F, अपरे चक्रशङ्खाभ्यां पाद -G H, 10. E पाठः, देव -B, 11. परश्वथान् - B, 12. चक्र -G H, खड्गं - D, 13. C पाठः, भुजश्चाथ -B, भुजा वा द्वा -F, ज्वलनादेव - H, 14. मनन्यथा - F, 15. देव्यो(या?)रुभौ - E G, देव्यौ उभौ -H, 16. कीर्त्याद्या - B.

स्थानकासन[1]संशेते देवीनां देववद्भवेत् ।
वर्णायुधविधानेन[2] वर्णायुधधरो भवेत्[3] ॥ 28

चक्रस्योपरि विन्यस्य[4] फणिराजःपरिष्कृतः ।
पञ्चसप्तनवास्यं स्यात् सकलं[5] मणिसंयुतम् ॥ 29

शतं वाथ सहस्रं वा फणिराजस्य शीर्षकम् ।
चक्रस्यापरपार्श्वे [6]स्यादनन्तस्य [7]तनुं तथा ॥ 30

मण्डलं वाथ चक्रं वा दण्डाकारेण एव वा[8] ।
फणानां छत्रवच्छाद्य देवस्योपरि विन्यसेत् ॥ 31

अनन्तगरुडं देवमुदयादित्य[9]भास्वरम् ।
पारिजाततरुच्छाया नक्रतोरणहेमकैः[10] ॥ 32

एवं रूपं स्मरेद्बुध्या सर्वापद्भ्यो विमुच्यते ।
अन्यत्र देवरूपोऽस्ति शृणुराजन् महामते ॥ 33

परिवारादि संयुक्तमष्टशक्तिभिरावृतम् ।
अष्टद्विरष्ट[11]तद्युग्मं[12] चतुष्षष्टिभुजं तथा ॥ 34

शतमष्टोत्तरं वापि[13] सहस्रमयुतं तथा ।
दिव्यायुधं च बाहुभ्यामसङ्ख्यातं[14] परिश्रुतम् ॥ 35

पूर्वेण संहितोक्तेन बहुधा दिव्यविग्रहम् ।
यन्त्रमुक्तकरामुक्तमुक्तामुक्तममुक्तकम् ॥ 36

---

1. कां शेते – F, 2. निधानेन –C, 3. V. No. 28 & 29 श्लोकयोर्मध्ये D मातृकाय विद्यमानविषयः भूयो मूर्त विशेषोऽपि शृणु वक्ष्यामि भूपते । वैनतेयः चतुभा... पूर्वे बद्धाञ्जलिर्भवेत् ॥ 4. विन्यस्तः –B. 5. सकला –G H 6. तु –C D F H. 7. तनूं – C, 8. वा पुनः –B. 9. उद्यदादित्य –B. 10. हंसतं . – B ... अष्टाभिरष्ट – D, अष्टद्व्यष्टक –B. 12. तद्युक्तं –D. 13. त्रिशत –A ... G H. 14. B पाठः, सङ्ख्यादि – C G.

[illegible]कं [illegible]विंशं प्रोक्तं आयुधानां विशेषत[illegible] [illegible]
चक्रशङ्खगदापाशमुसलामशपमजम [illegible] 37

[illegible] (भ्रुशुण्डी?) [illegible] शूलं परशुं [illegible]
[illegible]भिण्डिपालं च [illegible]खेटकसंयुतम् ॥ 38

[illegible] अष्टिकक[illegible]
[illegible]तिकं [illegible] चापे [illegible] सन[illegible] ॥

[illegible]विद्युच्चापि [illegible]कम्
[illegible]शस्त्रादिकं [illegible] 40

[illegible]मयुक्त[illegible]स्त्रामित्यभिधीयते
[illegible] दक्षिणं वामबाहवया: [illegible] 41

[illegible] चक्रस्य[illegible] दण्ड कुन्त[15] परश्वधम्
कुठारं [illegible]खड्गगदायुधम्[17] 42

मुसलं [illegible] (?) [illegible] शतघ्न्यशनिशक्तिकम्
[illegible]ास्त्रवैष्णाव्य रौद्रं नारायणास्त्रकम् 43

ऐन्द्रमाग्नेययाम्यं च निऋतिं[18] वरुणानिलम्[19] ।
सौम्यं कौबेरमैशान्यं पैनाकं यक्षराक्षसम् ॥ 44

---

1. विशेषतः - [illegible] भुशुण्ठी - [illegible] 3. गात्री - A C E G H. [illegible] [illegible]ष्टि - G H. [illegible] [illegible]राचक्रकुवष्टिकं - B, [illegible] [illegible]णाशनः - C F, [illegible]णि [illegible]णाशने - G, 7. B पाठः [illegible]सिला - [illegible] B पाठः, [illegible]कायुधं - A C E G H. [illegible]कायुष - F. [illegible] [illegible]स्त्र - C E F G [illegible] [illegible] - B, 11. C पाठः [illegible] [illegible]तितें - B, 12. [illegible]कें - B, 13. [illegible]नकादि - [illegible] 14. चक्रस्यात् - G H, 15. [illegible] पाठः कुन्तं - B 16. [illegible]राष्ठाल - C, [illegible] - F, 17. [illegible]दायुधे - [illegible] 18. [illegible]ति - G 19. B पाठः [illegible]रुणालयं - A.

आसुर[1] गुह्यकं सैद्धं किन्नरं गुह्यकं तथा ।
विद्याधरास्त्रं नागास्त्रं वैद्युतं[2] मोहनास्त्रकम् ॥ 25

त्वाष्ट्र[3] कन्दर्पकास्त्रं स्यादिन्द्रचक्रेतिकालकम् ।
आह्वचक्रं तु चक्रस्याद्दारुण चक्रमित्यपि ॥ 26

कङ्कणी[4] कि(क?)मणी[5]चैव क्षुद्रक्षुरि(र?)कशस्त्रकम् ।
त्वकन्नर्मपरिघ शूलं त्रिशूलं[6] पैतृकास्त्रकम् ॥ 27

पारमेष्ठीकवज्रं स्याद्गदास्त्रमरुणास्त्रकम् ।
योऽन्त्य[7] कन्दर्पनामास्त्र[8] चतुष्षष्टिप्रवर्तकाः[9] ॥ 28

वापे[10] शक्त्रं च पाशं स्याद्धर्मपाशं च कालकम् ।
वारुण नागपाशं स्याच्छोष्योन्मादवशीकरम् ॥ 29

दावणास्त्रं च सन्ताप मोहनं वामनास्त्रकम् ।
कर्नाविसिति[11] खेटं स्यादमुशं च[12] कुठारकम् ॥ 30

शराब्द्वयं[13] स्वास्तिक च मालाहल[14]मुलूखलम् ।
पद्मं च दर्पणं[15] घण्टा अशनिःशिलयापि च ॥ 31

वायुजायास्त्रस्वापं स्यात्तापस्योद्वर्तनं[16] धृतिम्[17] ।
रहस्यं[18] च परामुख्यं तिर्यङ्मुखमवाङ्मुखम् ॥ 32

---

1. G पाठः, असुरं - A. 2. पैशाचं - C E F G 3. त्वाष्ट्रा - B E. 4. [illegible] - H. 5. G पाठः, कङ्किणी - A. 6. त्रिशूल - G. 7. B पाठः, योऽन्त्य - C E F. [illegible]ज्यं - H. 8. C पाठः, [illegible]ना - A B. 9. पुरश्चंकाः - B. 10. C पाठः [illegible] - A B. 11. B पाठः, वशाते - C E F H, वशिति - A. विंशाते - G. 12. C पाठः [illegible]च्चन - A B. 13. शराबन्धु - H 14. B पाठः, हलदु - A C G. 15. C पाठः [illegible]खापंणं - H. 16. [illegible]मस्यावर्तनं - G. 17. धृतिः - B. धृति - G. 18. [illegible] पाठः, [illegible] - [illegible] - A B.

सात्यकीर्त्यस्त्रचैतन्यं स्तम्भनं शतवक्त्रकम् ।
विलापं बधिरास्त्रं[1] स्याद्दण्डिका कामरूपकम्[2] ॥ 53

कम्पनोन्मादमायास्त्रं मायावी[3] मोहनास्त्रकम् ।
वप्रास्त्रं शकटास्त्रं च शब्दभेदिं[4] मनो भवेत्[5] ॥ 54

दूरवेद्य[6]स्त्रसंग्रासं[7] नागास्त्रं बर्हिषा[8]स्त्रकम् ।
स्रुवं घृतं शरावं स्याद्द्वयंजनं छत्रजृम्भणम् ॥ 55

पर्जन्यं विनता शार्ङ्गं चतुष्षष्ठिनिवर्तकाः ।
इत्याद्यसंङ्ख्यभेदानि आयुधानि[9] विशेषतः ॥ 56

एकः[10] द्वित्रिचतुःपञ्चषण्मुखं द्विगुणीकृतम् ।
शतं सहस्रमयुतं मूर्ध्निबाहुस्तदङ्घ्रिकम् ॥ 57

देवं त्रिंशीर्षकोपेतं गुणत्रयमिहोच्यते ।
श्वेतं रक्तमथो कृष्णं पीतं श्यामंच[11] पञ्चमम्[12] ॥ 58

पञ्चवर्णमिमं[13] देवं पञ्चग्रीवं प्रकल्पयेत् ।
अन्यत्र चक्रदेवोऽस्ति गुह्यादगुह्यतरं परम् ॥ 59

चक्रं षट्कोणसंयुक्तं तन्मध्ये रूपमद्भुतम् ।
षण्मुखं द्वादशभुजं चतुर्विंशद्भुजं तथा ॥ 60

मन्त्राक्षराणि षट्कंस्याद्वर्गषट्कं च कथ्यते ।
षडहो वैदिकं चैव आग्निष्ठोमं षडग्निकम् ॥ 61

1. बहिरास्त्रं – B, 2. रूपिकं –B, 3. माया वै – B G, 4. वेर्दि – E, वेद्यं – B. वेधिं – F, वेधि – G, 5. भवं – B, 6. दूरवेधिं – F, 7. च संग्रासं – C, संग्रास – G, 8. महिषा – H, 9. विशेषणं – H, 10. एकं – G, 11. श्यामेति – C E F G, 12. पञ्चकं – C E F G, 13. मिदं – B H.

षड्रुतुं षड्रसं ज्ञेयं ज्ञानषाड्गुण्यविग्रहम् ।
मातॄणां[1] कृत्यषट्कंस्यात् समयानां च षड्विधम् ॥ 62

पश्वाकृष्यादि षट्कर्म षट्कसंज्ञायुधानि वै ।
एवं बहुविधं प्रोक्तं षण्मुखस्य विशेषणम् ॥ 63

बाह्वोश्चतुर्विंशतीनां चक्रैकाग्निरैककम्[2] ।
सव्यदक्षिणबाहूनां चक्रमग्निं परस्परम् ॥ 64

अन्यत्रायुधकं चैव स्थानके गमनेऽपि च ।
चक्रषट्कोणतन्मध्ये केशवादीन्[3] प्रकल्पयेत्[4] ॥ 65

अष्टबाहुधरो[5] देवो मूर्तिरायुधसंज्ञितः[6] ।
पाशामुशासि[7] खेटं स्यात्तोमरं चारिशेषतः[8] ॥ 66

सर्वेषां धार्यमेवेदं[9] मूर्तीनामायुधं भवेत् ।
चक्र[10]षट्कोणतन्मध्ये चतुर्व्यूहादि द्वादशम्[11] ॥ 67

चतुर्बाहुं यथापूर्वं चक्रायुधचतुष्टयम् ।
चक्रषट्कोणतन्मध्येऽवतारदशकं भवेत् ॥ 68

मत्स्यादि द्वित्रि[12]पर्यन्तमायुधं पूर्ववद्भवेत् ।
सुदर्शनस्यायुधानि चत्वारश्चाष्टकेऽपि वा ॥ 69

चक्रषट्कोणतन्मध्ये पुष्पबाणेक्षु[13]चापकम् ।
दशबाहुसमायुक्तं कामचक्रमिहोच्यते ॥ 70

---

1. द्विमातॄणां - G 2. चैकाब्जिरनेककम् - G 3. केशवादीनि - C E F H. 4. कल्पयेत् - C E F, 5. बाह्वधरो - H, 6. संहितं - H, 7. पाशाङ्कुशादि - A. 8. उ विशेषतः - A. 9. C पाठः, धार्यमेदेव - A C F, धाराणादेव - B, धार्यते देवं -G H, 10. C पाठः, चतुः - B, 11. B पाठः, द्वादशीं - A E F G H, 12. कर्कि --B G 13. बाणेषु - B.

चक्रषट्कोणमध्ये तु गोपालवपुषं परम्
शंखं वेणु च शक्ति च सशस्त्रं द्वादशं भुजम् ॥ 71

रक्तवर्णमुदाराङ्गं देवीनामष्टसंयुतम्[1] ।
चक्रगोपालमाख्यातं सर्वदेवात्परात्परम् ॥ 72

चक्रषट्कोणमध्ये तु बाह्वोः षोडशचापधृक्[2] ।
पारिषादेन[3] संयुक्त महासौदर्शनं परम् ॥ 73

चक्रषट्कोणमध्ये तु[4] अन्यथा रूपकं भवेत् ।
पद्माद्यष्टायुधधरं रक्तवर्णं त्रिलोचनम् ॥ 74

जटामकुटनागेन्द्र चन्द्र[5]जाह्नविसंयुतम्[6] ।
दंष्ट्राकरालवदनो नामतो रौद्रचक्रकः[7] ॥ 75

सौदर्शनस्य[8] सम्भेदो[9] संज्ञा वै[10] कथ्यते बुधैः ।
आद्य[11]मेकादशो[12]मूर्तियोगमूर्तियष्टकं भवेत्[13] ॥ 76

भोगमूर्त्यष्टभेदोऽस्ति अन्येषां वीरमूर्तिकम् ।
[14]एकग्रीवोभय[15]मुखं त्रिमुखं च चतुर्मुखम् ॥ 77

पञ्चवक्त्रं[16] च षड्वक्त्लं बाहुवैशेषिकं भवेत् ।
अनन्तगरुडारूढं षोडशं भुजमेव[17] वा ॥ 78

---

1. देव्यष्टकसमन्वितं – B, 2. E पाठः, धृत् – B G, युक् – H, 3. C पाठः, पारिषादेव – B G, 4. तन्मध्ये – B G 5. चन्द्रार्करवि – B, चन्द्रं दा रवि – H, 6. C पाठः, संयुतः – B G H, 7. B पाठः, रौद्र चक्रेति नामतः – C E F G H, 8. सौदर्शनेति – F, सुदर्शनस्य – G, 9. सम्भेदं – C G H, 10. ते – H, 11. आदित्य – H, 12. दशी – B, 13. विधं – C F G H, 14. मुखग्रीवो – G, 15. द्वय – B, हय – G, 16. चक्रं – F, 17. भुजषोडशमेव – B.

द्वात्रिंशश्च चतुष्षष्टिः शतं साष्टक[1]विंशतिम् ।
सहस्रमयुतं चैव असंख्यं[2] तस्य शीर्षकम्[3] ।। 79

केशवादि[4] द्वादशकं वासुदेवादि द्वादशम्[5] ।
दशावतारकन्दर्पं चक्रगोपालमेव च ।। 80

महासौदर्शनं रौद्रं चक्रभेदाष्टषष्टिकम् ।। 81

इति श्रीपाञ्चरात्रे विहगेन्द्रसंहितायां तन्त्ररहस्ये
अगस्त्यप्रोक्ते श्रीसुदर्शनकल्पे
वाहनायुधमूर्तिभेदो[6] नाम
तृतीयःपटलः ।



1.अष्टक - C F G H, 2. E पाठः, वाप्यसंख्यं - B, 3. भीषकं - G, 4. C पाठः, केशवादीन् - B, 5. C पाठः, द्वादश - B, 6. मूर्तिभेदकथनं - C.

चतुर्थः पटलः

शृणु राजन्महावीरचक्रमूर्तिविशेषकम् ।
पूर्वं सुदर्शनं देवं अपरेण नृसिह्मकम् ।। 1

अष्टबाहुस्तथाप्यष्टौ षोडशे षोडशः[1]स्मृतः ।
यावद्बाहुविवृद्धिस्यात्तावद्बाहुविवृद्धिकम्[2] ।। 2

सर्वेषु चक्रं बिभ्रुयादपराङ्गे विशेषतः ।
अष्टायुधधरंदेवं अष्टायुधधरेण च ।। 3

नृहरिस्थानके पूर्वे पद्मा[3]द्यष्टायुधं भवेत् ।
परं[4] सुदर्शनं चैव चक्रधृक् सर्वबाहुकः[5] ।। 4

अष्टबाहुसहस्राकः[6] तत्कुर्यात्स्थानकं[7] भवेत् ।
आलिख्य षोडशभुजामपराङ्गे नृसिह्मके[8] ।। 5

सुदर्शनं नृसिह्मं च नरसिह्मसुदर्शनम् ।
सुदर्शने नृसिह्मे वा एकरूपमिहोच्यते ।। 6

नरसिह्मविशेषोऽस्ति[9] चतुस्सप्ततिविग्रहः ।
नरसिह्मेति[10] मूर्तीनां नामधेयं [11]सुकथ्यते ।। 7

प्रथमं स्वयंभुसिह्म[12]स्याद्भयानां[13] मोक्षसिह्मकम् ।
विजयं नरसिह्मं च[14] छत्राख्यं नरसिह्मकम् ।। 8

---

1. षोडशं - B, 2. विवृद्धिकः - B, 3. पक्षा - H, 4. B पाठः, अपरे - A C E F G H, 'अपरे' इत्यधिकाक्षर पाठः, 5. बाहुकं - B H, बाहवः - A, 6. धरो देवः - B, 7. B पाठः, 8. स्थानको - C E, 8. नृसिह्मकं - B G H, 9. विशेषोऽपि - B, 10. C पाठः, नृसिह्मेति - A B, 11. C पाठः, नामधेयानि - A B, 12. C पाठः, स्वरनृसिह्म - A B, 13. अभयं - B, 14. B पाठः, नृसिह्मकश्चैव - A C E F, 'नृसिह्मकश्चैव' इत्यनेन अधिकैकाक्षरम् ।

दीर्घसिह्मं च दृप्तानां विरूपं च नृसिह्मकम्[1] ।
पूर्णसिह्माब्धिसिह्मौ[2] स्याल्लक्ष्मीसिह्मावुभावपि ॥ 9

जयलक्ष्मी[3]नृसिह्माख्यं योगायोगेश्वरावपि ।
[4]दीप्तिसिह्माब्धिसिह्मस्यात् पुष्टिंभूतप्रमाथिनाम्[5] ॥ 10

ज्वालानृसिह्म उग्रं च[6] अघोरं च [7]नृसिह्मकम् ।
विदारणनृसिह्मस्यात् [8]अहोबिलनृसिह्मकम् ॥ 11

स्तम्भसिह्म[9]महासिह्मौ पातालनरसिह्मकम् ।
[10]वक्षं चानन्तसिह्मं च ग्रहणप्रमनावपि ॥ 12

[11]आवेशनरसिह्मं चाप्यट्ट[12]हासनृसिह्मकम् ।
[13]नवव्यूहनृसिह्मस्याच्चक्रसिह्मं दिशो दश ॥ 13

चण्डसंहारसिह्मं च[14] प्रसादब्रह्मसिह्मकम्[15] ।
विष्णुरौद्रं च मार्ताण्डं चन्द्रभैरवसिह्मकम् ॥ 14

पृथिवी वायुसिह्मं चाप्याकाश[16] नरसिह्मकम् ।
ज्वलनाधारसिह्मस्यादमृतास्यं[17] तथैव च ॥ 15

[18]आत्मं सत्यं च यज्ञं स्यादन्नदानं प्रभासकम्[19] ।
विश्वरूपं त्रितारं च चतुस्सप्ततिविग्रहम्[20] ॥ 16

---

1. B पाठः, नवमश्लोकादारभ्य एकादशश्लोकस्य पूर्वार्धपर्यन्तं A मातृकायां नास्ति, नवमश्लोकस्य पूर्वार्धमात्रं A C E F मातृकासु न दृश्यते. 2. B पाठः, सिह्म – C E F, 3. विजयलक्ष्मी –C E F G H, 'विजय' इत्यनेन अधिकैकाक्षरम्, 4. F पाठः, दीप्त –B, 5. G पाठः, पुष्टं –C, वृष्टं –A B, पूर्वभूतप्रमाथिकं – H, 6. C पाठः, ह्रश्चापि – B, 7. ओं घोरं चन्द्र – H, 8. बल – F H, 9. स्तम्भस्तम्भ – H, 10. पक्षं –H, 11. C पाठः, अघोर –B. 12. च अट्ट –C F G, 13. नृप –H, 14. सिह्मौ च –B, 15. सिह्मकौ –B, 16. च आकाश –C E F G, 17. B पाठः, मृतं हंसं–A C F G, 18. आत्म्यं–H, 19. प्रभावकं–H, 20. E पाठः, विग्रहः–B.

इत्येवं नरसिह्मस्यादायुधानां विभेदकम्[1] ।
अन्यत्प्रकरणं वक्ष्ये मण्डपस्य विशेषणम् ।। 17

अष्टहस्तप्रमाणं स्यात् सममायामविस्तरम् ।
षोडशस्तम्भसंयुक्तमेकाशीति[2] पदं भवेत्[3] ।। 18

मध्ये नवपदं वेदिः[4] रत्नैर्हेममयैर्भवेत् ।
तत्र[5] मण्डपमध्यस्थे वेदिका च[6] हिरण्मयी[7] ।। 19

दिव्यसिह्मासनैश्चित्रैः हेमपात्रपरिच्छदैः ।
दिव्याम्बरधरैर्माल्यैर्दिव्याभरणभूषितैः ।। 20

तप्तजाम्बूनदैस्तम्भैः[8] नानारत्नमयैश्शुभैः ।
महापीठस्थितं देवं सहस्रांशु[9] समप्रभम् ।। 21

क्षौमवस्त्रवितानैश्च पताकाभिरलङ्कृतैः[10] ।
रत्नैर्मरकतैस्तम्भैः स्फटिकोपलजैस्थलैः ।। 22

प्रवालैःपद्मरागैश्च शोभितैश्चित्रितैर्विधैः[11] ।
कुड्यद्वारकवाटैश्च द्वारतोरणसंयुतैः ।। 23

देवीनामष्टभिर्युक्तैश्चक्रैक्कादशसेवितैः ।
आवृतैःपरिवाराणां [12]विष्णुभूतैस्सुसेवितैः[13] ।। 24

1.विशेषकं - B H, 2. एकोऽशीति - C, 3. भजेत् - F, 4. वेदिं - H, 5. B पाठः, रत्न - A C E G H, 6. B पाठः, वैदिकैश्च - A E G H, 7. हिरण्मयं - H, 8. चित्रैः - F G H, 9. सद्धवस्त्रांशु - E, 10. अलङ्कृतं - C, 11. चित्रितैर्विविधैरपि - B, 12. F पाठः, विष्वग्भूतैः - A B, 13. C पाठः, भूतैस्ससेवितैः - A E F, भूतैश्च - B.

दिशागजैर्दिशानागैरिन्द्रादीन्[1] कुमुदादिभिः ।
कुमुदः कुमुदाक्षश्च पुण्डरीकश्च[2] वामनः ।। 25

शमुकर्णस्सर्वनेत्रस्सुमुखस्संप्रतिष्ठितः[3] ।
मेषादि[4] राशिभिस्तुल्यैः ग्रहाणां[5] पञ्चभूतकैः[6] ।। 26

मुनिभिः सनकाद्यैश्च साप्सरैर्देवदानवैः ।
दिव्यदुन्दुभिनादैश्च दिव्यगानैः [7]स्तुवन्दिभिः ।। 27

सर्वायुधधरोपेतैः चान्तरङ्गैश्च सेवितैः ।
भीषणायुधभेदैश्च[8] दैत्यदानवमर्दनैः[9] ।। 28

शोणिताक्तैश्च सर्वाङ्गैर्मेदसारुणलम्पटैः[10] ।
विद्युद्दंष्ठ्रं महाकायं ज्वलन्तमिव पावकम् ।। 29

इत्येवं चक्रमूर्तीनामावृतैःपरिवारकैः ।
ब्रह्माविष्णुश्च रुद्रैश्च महेन्द्रैरुपसेवितैः ।। 30

शफ्मद्मनिधिभ्यां च चन्द्रदित्यैस्सहामरैः ।
लम्बोदरं च दुर्गां च शुभं[11] क्षेत्रपतिं विदिक् ।। 31

1.इन्द्रादि - C, इन्द्राद्यैः - B, 2. कोऽथ - B, 3. सुप्रतिष्ठितः - C E FG, 4. मेषादीन् - G H, 5. सर्गकैः - B, 6. भूतपञ्चकैः - B, भूतपञ्चमैः - G H, 7. B पाठः, मानैस्तु वन्दिभिः - A, 8. B पाठः, भीतैश्च - A C E F, भीषैश्च - G, 9. नाशनैः - B, 10. लिम्पटैः - G, 11. B पाठः, शुभे - A, प

चतुरात्मैः पुराणैश्च स्मृतिशास्त्रसमावृतैः[1] ।
एषमध्यस्थदेवोऽयं सर्वाभीष्टफलावहः ।। 32

एवं रूपं समभ्यर्च्येद[2]भावे हृदि चिन्तयेत् ।। 33

इति श्रीपाञ्चरात्रे विहगेन्द्रसंहितायां तन्त्ररहस्ये
अगस्त्यप्रोक्ते श्रीसुदर्शनकल्पे
पूर्वापराङ्गविधानो[3] नाम
चतुर्थःपटलः ।



---

1. B पाठः, समावृतं – A, शास्त्राभिरावृतैः – H, 2. B पाठः, समभ्यर्च्यात् – A,
3. विधिः – C.

पञ्चमःपटलः

अम्बरीषः-

नमस्ते मुनिशार्दूल मलायाद्रिनिवासिने ।
. . .. [1] ।।

अगस्त्यः-

प्रतिष्ठालक्षणं वक्ष्ये सर्वत्र हितकाम्यया ।
आयुरारोग्यविजयं पुत्रपौत्रविवर्धनम् ।। 1

भूतप्रेता[2]पिशाचाश्च[3] यक्षराक्षसपन्नगाः ।
सर्वदुष्टविनाशार्थं[4] सर्वोपद्रवनाशनम् ।। 2

सर्वशान्तिकरं पुण्यं सर्वशत्रुविदारणम् ।
सर्वैश्वर्यप्रदं तेजस्सर्वरक्षाकरं परम् ।। 3

साधु[5]संरक्षणार्थस्य[6] दुष्कृतस्य विनाशनम्[7] ।
धर्म[8]संस्थापनार्थं च स्थापयेच्चक्रराजकम् ।। 4

लीलया सिकतैः बालैः[9] [10]कारयेच्चक्रमन्दिरम् ।
तस्मात्सालोक्यमाप्नोति शैलदारुंश्च[11] वंशजान् ।।5

चक्रबेरं तु[12] यःकुर्यात् सर्वान्कामानवाप्नुयात् ।
सारूप्यमभवत्पश्चात्पुत्रदारांश्च सानुगान्[13] ।। 6

---

1. G पाठः, A to F मातृकासु अयं श्लोकः न दृश्यते, 2. E पाठः, भूताः प्रेताः - A C, 3. पिशाचश्च - E, 4. C पाठः, सर्वे दुष्टाः विनश्यन्ति - B, दुष्टविनाशार्थं - A E F, 5. C पाठः, सुधा - A B, 6 . E पाठः, संरक्षनार्थाय - B, 7. दुष्कृतां च - B, 8. सर्व - H, 9. बालो - C E F G, 10. धारयेत् - H, 11. दारुश्च - F, 12. C पाठः, बेरेति - A E F G H, बेरे च - B, 13. दारश्च सानुगैः - B.

ब्रह्मेशानादि देवांश्च योगिध्येयमनुत्तमम्[1] ।
वेदान्तवेद्यं पुरुषं मनसातीतगोचरम् ।। 7

सर्वभूतान्तरात्मानं निष्कलं सकलं परम् ।
क्षीरे सर्पिस्तिले तैलं पुष्पे गन्धः फले[2] रसः ।। 8

यथायसि महासारः काष्ठे चाग्निरिव स्थितः ।
एवं संसृष्ठवस्त्वेदं[3] रूपीकृत्य प्रयत्नतः[4] ।। 9

तद्रूपे देवमावाह्य मन्त्रेण स जलेन च ।
पादं द्रव्यमुपादाने पादं रूपाकृतिर्भवेत् ।। 10

चित्रकर्मेति[5] पादं स्यात् स्थापने[6] पूर्णमेव च ।
नैवेद्यं चित्रकर्मान्ते देवं साधारणार्चनम् ।। 11

विना संस्थापनायेतिं प्रतिष्ठावरदानकंम् ।
स्नानासनादि पूज्योऽयं पुनीतः[7] उपनीतवत् ।। 12

नूतनां[8] प्रतिमां कुर्याच्छुभे काले शुभर्क्षके ।
बिम्बे[9] पुरातने जीर्णे तत्कालेऽन्यत्र[10] कल्पयेत् ।। 13

रत्नेषु स्फाटिके[11] स्वर्णे रजते[12] ताम्रकेऽपि वा ।
क्षणिके वार्चयेद्देवमावाह्य विधिपूर्वकम् ।। 14

---

1. B पाठः, मनुत्तमे - F, 2. फलैः - B, 3. E पाठः, वस्त्वेकं - B, वस्त्वीदं - C, 4. B पाठः, सयत्नतः - A E G H, 5. G पाठः, चित्रकर्मेति त्रिपादं - A B, 6. पूर्वमेव - H, 7. C पाठः, अनुनीतः - A B E, अनुनीतं - G, 8. नूतनं - A, 9. B पाठः, प्रतिमे - A C E F G, 10. B पाठः, कालेऽन्यव - A, 11. C पाठः, प्रतिमे - B, 12. राजते - H.

चक्राब्जे मण्डले कुम्भे सोदके सूत्रवेष्टिते ।
बीजं पिष्टं तथैवान्नं[1] फलं पुष्पं[2] जलं तथा ।। 15

गन्धं वेदिं सकृत्कूर्चमित्यादि क्षणिकं मतम् ।
येन केन प्रकारेण कुर्यादच्छिद्रभूषणम् ।। 16

पुंनस्तत्प्रतिमां कुर्यात् काले बेरविशुद्धिकम् ।
स्नपनं[3] प्रोक्षणं कुर्यादर्चयेच्च[4] यथाक्रमम् ।। 17

नूतनप्रतिमां कुर्याच्चक्रराजोक्तमार्गवत् ।
स्थापकं[5] लक्षणोपेतं सर्वशास्त्रविशारदम् ।। 18

वसन्ते पुष्यमासे[6] वा पूर्वपक्षे शुभर्क्षके ।
कर्तानुकूलभे लग्ने स्थापयेत्सुसमाहितः ।। 19

नवसप्तपञ्चदिने ध्वजारोहामुरार्पणम् ।
कुण्डमण्डपमानेन वेदिकां कारयेद्बुधः ।। 20

व्रतोपवासैःकृच्छ्रं स्याच्चान्द्राणपुरस्सरः[7] ।
कूष्माण्डगणहोमैश्च स्थापकस्य चरेद्बुधः ।। 21

आलयस्थापनं[8] कुर्यात् कूष्माण्डगणहोमकम् ।
ऐन्दवं च[9] महाबेरं ग्रहार्चैः कृच्छ्रमेकशः ।। 22

समाहितमनाभूत्वा पूर्वेद्युरधिवासनम् ।
धौतवस्त्रोत्तरीयैश्च स्नातो नियतमानसः ।। 23

1.तथैवाह–H, 2. पिष्टं – H, 3. स्थापनं – G, 4. B पाठः, दर्चयन्ति – A C E F G H, 5. स्थापनं – F, 6. G पाठः, पुष्पमासे – A B, 7. पुरस्कृतः – C E F G, पुरस्कृतं – H, 8. स्थापने – F, 9. ऐन्द्रपञ्च – G.

चन्दनाद्यङ्गरागैश्च देवताभिरलङ्कृतम्[1] ।
यागमण्डपमावेश्य बेरस्नपनकर्मकृत् ।। 24

शङ्खकाहलभेरीच[2] ब्राह्मणैस्स्वस्तिवाचकैः ।
रक्षाबन्धविधानैश्च विधिसमल्पपूर्वकम् ।। 25

विष्णोरराटमासीति[3] कौतुकं बन्धयेद्बुधः ।
आचार्यऋत्विजाभ्यां च[4] बन्धेत् बेरस्य कौतुके[5] ।। 26

कूर्चग्रन्थिं समारोप्य ऊर्ध्वाग्रं करकोपरि[6] ।
आच्छाद्य नववस्त्रेण देवीनां च तथैव च ।। 27

नदीतटाके कूपे[7] वा अवटे शाययेद्बुधः ।
प्राचीनाग्रेषु दर्भेषु प्रागग्रे[8] प्राक्छिरःपरम्[9] ।। 28

प्रासादं[10] स्थावरं वापि [11]दर्पणेनाधिवासनम् ।
विशालेऽस्मिन् बृहत्पात्रे बिम्बाग्रे[12] जलपूरके[13] ।। 29

पात्रस्योपरि संस्थाप्य निर्मलं बृहद्दर्पणम्[14] ।
बेरं वस्त्रेण संछाद्य कूर्चे दर्भेषु संयुतम्[15] ।। 30

1.कृतः - H, 2. C पाठः, भेरीभिः - A B, भेरौ च - F, 3. रराटमसीति - G, 4. ऋत्विजा सार्धं - B. 5. बन्धयेद्धेरकौतुकं - B, 6. G पाठः, ऊर्ध्वाग्रपुरकोपरौ - A, 7. C पाठः, 8. C पाठः, शाययेत् - B G, 9. B पाठः, छिरोपरि - A C E F G, 10. प्रसादं - G, 11. C पाठः, दर्पणे चाधि - A B, 12. बिम्बाथ - C, 13. पूरिते - G H, 14. दर्पणं बृहत् & महत् - H, 15. संयुतः - B.

प्रतिबिम्बे कृते पात्रे[1] स्थावरेष्वधिवासनम्[2] ।
त्रैगुण्यसूत्रमावेष्ठ्य[3] कलशे वर्धकी घटे ॥ 31

वेदि मध्ये घटं स्थाप्य पार्श्वयोर्द्वय[4]वर्धनी ।
तद्बाह्ये कलशं[5] स्थाप्य[6] चतुर्दिक्षु त्रयस्त्रयम्[7] ॥ 32

घटे देवं[8] समावाह्य यन्त्रं बिम्बे[9] समन्त्रकम् ।
देवीनां वर्धनीं[10] स्थाप्य बिम्बसंख्या च वर्धनी ॥ 33

नदीतोयं समापूर्य कलशेषु घटेषु च ।
चक्रयन्त्रं[11] घटे न्यस्य इतरे प्रणवं तथा ॥ 34

श्रीभूमिबीजसंयुक्तं तल्लेखासु समाहितः ।
पञ्चगव्योदकं पूर्वे क्षीरतोयं[12] च दक्षिणे ॥ 35

फलोदकं[13] पश्चिमे स्यात् सौम्ये पुष्पोदकं भवेत् ।
गृहे[14] चत्वारि कलशा[15]न्यालये द्वादशं तथा ॥ 36

एवं क्रमेण संस्थाप्य रत्नलोहसमन्वितम्[16] ।
गन्धवस्त्रादि कूर्चैश्च घटसंस्थापनं क्रमात् ॥ 37

चक्रमन्त्रेण संस्पृष्ट्वा घटे जप्त्वा सहस्रकम् ।
देवीमन्त्रेण वर्धक्या[17]मष्टोत्तरशतं पृथक् ॥ 38

---

1. B पाठः, पात्रं - A C E F G , 2. वासितं - G, 3. B पाठः, मावृत्य - A C E G H, 4. मय - C, 5. कलशाः - C, 6. स्थाप्याः - C, 7. B पाठः, त्रयस्त्रयः - A E G, 8. देवे - F, 9. यन्त्रबिम्बे - F, 10. C पाठः, वर्धकीं - A B 11. आमन्त्र्य - H, 12. त्वक्तोयं - C F, 13. फलोदके - E G H, 14. B पाठः, गृहार्चे - A G, 15. कलशं - E F G, 16. समन्वितः - G, 17. ध्यात्वा - G.

कलशद्वादश जप्त्वा केशवादीनि नामभिः[2] ।
परिवारगणो[3]पेतमर्चयेच्च[4] पथक् पृथक् ।। 39

नैवेद्यान्तं[5] च सम्पूज्य दशदिग्बन्धनं चरेत्[6] ।
पश्चाद्धोमं समारभ्य स्वसूत्रेणोक्तमार्गतः[7] ।। 40

पुरस्तादाज्यभागान्तं समिदन्नाज्यलाजकम् ।
एकबेरस्य पालाशं देवीनां बिल्वखादिरौ[8] ।। 41

महाबेरप्रतिष्ठायां[9] चतुर्दिक्षुचतुस्समित् ।
पालाशोदुम्बराश्वत्थखादिरान्[10] क्रमशो हुनेत् ।। 42

समिदन्नाज्य[11]लाजांश्च[12] अष्टोत्तरसहस्रकम् ।
एकैकशो हुनेद्विद्वान् स्वादुद्रव्यचतुष्टयम् ।। 43

अतो देवो (वा?) इदं विष्णुर्विष्णोर्गायत्रमेव च ।
श्रीभूमि[13]देविगायत्र्या[14] अष्टोत्तरशतं हुनेत् ।। 44

गृहार्चेराहुतिशतमालये च सहस्रकम् ।
मूलमन्त्रेण हुत्वाथ देवीनां देवि[15]मन्त्रवित् ।। 45

---

१. कलशान् - C G. कलशां -F. २. नामयुक् - C F G H. ३. C पाठः, वारारणो - A B. ४. मर्चयन्ति -C. मर्चनीयं -G H. ५. निवेद्यान्तं - B. नैवेद्यान्नं च - G H. ६. भवेत् - C E G H. ७. C पाठः, मार्गवत् -A E F G. स्वसूत्रोक्तविधानतः - B. ८. B पाठः, खादिरं - A C F. ९. प्रतिष्ठा - E F. प्रतिष्ठां - H. तु - E F H. १०. C पाठः, श्वत्थो खादिरं - A E F G. श्वत्थखादिराः - B. ११. लाजं च - G H. १२. C पाठः, च अष्टोत्तर -A E. १३. देव्या -G H. १४. गायत्रीं-C E G H. १५. देव - C.

चक्रराजस्य मन्त्रेण समिदन्नाज्यलाजकम् ।
परिवारावरणोपेतं [1]द्रव्येष्वेकैकशं[2] हुनेत् ।। 46

गृहार्चैः स्थण्डिले[3] कुर्यादालये कुण्डमेव च ।
महावेराग्नि[4]चत्वारो[5] गृहार्चैरग्निरेककम्[6] ।। 47

देवीनां साग्निके[7] हुत्वा बिल्वं खादिरमेव च ।
समाप्य मन्त्रोपरिष्ठाद्दशदिग्बन्धनं पुनः ।। 48

वेदपाराणैस्स्तोत्रैः पुराणैश्शेषरात्रिकम् ।
नृत्तगीतमृदङ्गादि वाद्यैर्वीणादि मङ्गलैः ।। 49

पुण्याहघोषणैरन्यैर्वैष्णवानां च गायकैः ।
सर्वमङ्गलशब्दैश्च रात्रिशेषं[8] समापयेत् ।। 50

अपरेद्युः प्रभाते च स्नातो नियतमानसः ।
आचार्य[9]ऋत्विजाभ्यां[10] च परिचारक[11]संयुतः ।।51

यागमण्डपमावेश्य बेरस्योत्थापनं भवेत् ।
अधिशेते महाबेरमुत्थाप्य बलमन्त्रतः[12] ।। 52

स्नपनं वा भवेत्पूर्वं[13] यन्त्रपीठे[14] सधान्यके ।
संस्थाप्य[15] प्रायुखं बिम्बं नेत्रोन्मीलनमारभेत् ।। 53

---

१. द्रव्येऽपि – F, २. एकैकशो – B E, ३. E पाठः, स्थण्डिलं –A B, ४. महाबेरेऽग्नि –G, ५. चतुरो –B, ६. रेकके –F, ७. G पाठः, साग्निको –A B, ८. C पाठः, शेषरात्रि –A B G H, ९. आचार्यो –H, १०. ऋत्विग्भ्यां साकमाचार्यः – B,११. परिवारक –H, १२. मन्त्रवित् –C, १३. समापनं –C, स्नपनार्चनं भवेत्पीठे पूर्वं –G, १४. पञ्चपीते –F, १५. C पाठः, संज्ञाप्य –A B E F G.

शिल्पकस्थापको वापि हेमसूच्याथ वज्रकैः ।
ऊर्ध्वदृष्टिमधोदृष्टिं तिर्यक्दृष्टिं न कारयेत् ।। 54

समदृष्टिकृतो[1] शिल्पी मध्वाज्येन समाहितः ।
सूर्यसोमाग्निना[2] बुध्वा[3] नेत्राणां त्रयमाचरेत् ।। 55

रत्नधान्यफलैश्चैव[4] पूर्णकुम्भैश्च[5]दीपकैः ।
विप्रैस्सपत्निकैर्वस्त्रैः अन्नाद्यैरुपहारकैः[6] ।। 56

दर्पणैस्तालवृन्तैश्च[7] छत्रचामरमङ्गलैः ।
सकृत्सम्मृज्य तैस्सर्वं[8] स्तोत्रमङ्गलवाद्यकैः ।। 57

सर्वसन्नादतुमुलैर्नृत्तगीतादि शोभनैः ।
बिम्बं यवनिकावृत्य स्नापनं[9] सूक्त[10]पौरुषम्[11] ।। 58

पञ्चगव्येन कलशैश्शुद्धोदकमनन्तरम् ।
अश्वत्तोदुम्बरप्लक्षवटक्षीरिणिवृक्षकम् ।। 59

[12]एकोक्षीरिणि त्वक्तोयं फलोदकमनन्तरम् ।
कदलीनालिकेरं च बिल्वाम्रं पूग[13]जम्बुकम् ।। 60

बदरीपनस[14]श्चापि मातुलुङ्ग[15]गुलूचिकान्[16] ।
नारङ्गलिकुचैश्चान्यैः फलैरामलकैर्युतम् ।। 61

---

1. कृते - G H, 2. सोमसूर्याग्निना -C, 3. बुध्वा तु - B, 4. बलिश्चैव - C, बलांश्चैव - E F H, 5. स्स - B, 6. चारकैः - B, 7. वृन्दैश्च - H, 8. ते सर्वं - C E F G, 9. स्नपनं -B, 10. सूत्र - E G, 11. भूषणं - G, 12. एके -G, 13. पूक - G H, 14. C पाठः, बनस - A B, 15. लङ्ग - F, 16. C पाठः, बलूचिकान् -A B.

पुष्पोदकलशं चापि शुद्धोदकमनन्तरम् ।
वस्त्रगन्धादिभिर्धूपैः नैवेद्यान्तं समर्चयेत् ।। 62

महाबेरे[1] यथाकुर्याद्दिवीनां च यथाक्रमम् ।
होमकर्मसमारभ्य पूर्ववत्कल्पयेद्बुधः ।। 63

सुमुहूर्ते शुभलग्ने देवमावाहयेत्सुधीः ।
रविबिम्भेऽथवा व्योम्नि क्षीराब्धौ[2] परमे पदे ।। 64

देवदेवं समावाह्य देवीं सायुधवाहनम्[3] ।
परस्य सूक्ष्मस्य तथा स्थूलस्य तदनन्तरम् ।। 65

चिन्तासङ्क्रमणं तस्य बिम्बे प्रत्यागतं तथा ।
स्वागतोक्तिनमस्कारसन्निध्य[4]प्रार्थनं तथा ।। 66

इत्यावाहनमष्टात्मा[5] परस्य परमात्मनः ।
सर्वतेजोमयं रूपं सहस्रकिरणोज्वलम् ।। 67

तस्य बिम्बेषु संस्थाप्य प्राणायामक्रमो भवेत् ।
पूरकं कुम्भकं चैव महाबेरस्य कल्पयेत् ।। 68

जङ्गमप्रतिमां कुर्यात्पूरको कुम्भरेचकौ[6] ।
चक्रैक्कादशमूर्तिं च न्यस्येत्प्राकारपृष्टकम्[7] ।। 69

महाबेरे[8] विशेषोऽस्ति बेरं वेद्यान्तरे[9] न्यसेत् ।
तप्तजाम्बूनदैस्सूच्या निष्कत्रयसमन्वितम् ।। 70

---

1. बेरं - C F G, 2. B पाठः, क्षीराब्धेः -A C G, 3. वाहने -F, 4. F पाठः, नमस्कारः सान्निध्य -A C E, 5. मष्टाक्षर- H, 6. रेचकं-A C F G, 7. पृष्टतः - C, पुष्पकं - B H, 8. महाबेरं - H, 9. बेरवेद्यान्तरे - G.

बेरस्य मूर्ध्नि[1]मारभ्य पादपीठान्तमालिखेत् ।
बेरस्य सर्वदोषाणां स्मृत्वा भावेन संलिखेत् ।। 71

अङ्गोपाङ्गं च प्रत्यङ्गं[2] देवीनां [3]संलिखो भवेत् ।
मध्वाक्तसूचिकं[4] [5]कुर्यात्कापिला[6] सर्पिषेण[7] वा ।। 72

[8]आचार्यात्कर्षको[9] विद्वान् बेरं संस्थाप्य सुस्थिरम् ।
स्थावर प्रतिमे कुर्याज्जङ्गमे सूचिकं[10] विना ।। 73

पञ्चोपनिषदा[11] न्यस्य मन्त्रन्यासमनन्तरम् ।
अङ्गोपाङ्गं च प्रत्यङ्गं मातृका[12]क्रममन्त्रयुक् ।। 74

मन्त्रन्यासक्रमं न्यस्य[13] सर्वदिग्बन्धनं भवेत् ।
यथा बिम्बे तथा मन्त्रं सर्वेष्वष्टाक्षरं भवेत् ।। 75

मन्त्राभिपूरितघटे देवीनां वर्धकी[14] भवेत् ।
मालायुताक्षरीं जप्त्वा सहस्राक्षरमेव वा ।। 76

मूलमन्त्रेण वा[15] देवमथवा [16]पूर्षसूक्तकम् ।
येन केनापि मन्त्रेण चक्रराजाभिषेचनम् ।। 77

पश्चाद्धोमं समारोप्य चक्रराजं न्यवेदयेत् ।
पायसं [17]गुडसंयुक्तं[18] श्वेतं सूपोदनं घृतम्[19] ।। 78

---

1. शीर्ष –B, मूंध– C, 2. C पाठः, अङ्गप्रत्यङ्गोपाङ्गानां – B, 3. सलिखो – F, 4. सूचिका –B, 5. कार्या – B, 6. कपिला – B, 7. सर्पिषापि –B, 8. आचार्यः – B, 9. कर्षके – F G, कर्षको –B, 10. सूचकं – H, 11. पञ्चोपनिषदं – B, 12. प्रत्यङ्गमातृका – F, 13. C पाठः, क्रमान्यस्य – A B, 14. B पाठः, वर्धके – A, 15. मूलमन्त्रेऽथवा –G, 16. पुरुष – H, 17 गुल – E G, 18. संमिश्रं – B G H, 19. घृतं सूपोदकंघृतं – H,

तिलोदनं[1] हरिद्रान्नं कृत्वा दध्योदनं[2] फलम् ।
नानाविधोपहारैश्च[3] सर्व[4]सम्पूर्णकं भवेत् ।। 79

पश्चाद्दिशासु देवानां दिशाहोमं प्रकल्पयेत् ।
तत्तद्दिक्षु विदिक्षुश्च अग्निकार्य[5] पृथक् पृथक् ।। 80

देवीनां चक्रमूर्तीनां प्रधानाग्निषु होमयेत् ।
अन्यत्र परिवाराणां तत्तद्दिशि[6] हुनेद्बुधः ।। 81

पूर्व(र्वे ?) आहवनीं हुत्वा[7] ह्याग्नेये[8] जातवेदसम् ।
यामे च[9] दक्षिणाग्निं च[10] नैर्ऋते [11]कल्मषस्तथा[12] ।। 82

[13]गार्हपत्यं वारुणे च वायौ [14]वायुसखं तथा ।
सौम्ये दहनकं[15] हुत्वा[16] रौद्रे तपनमेव[17] च ।। 83

ऊर्ध्वे[18] स्वाहाप्रियं चैव ह्यधरे[19] च [20]स्वधाप्रियम् ।
ऊर्ध्वाधराग्नि[21] रुभयोरग्निरीशानकेषु च ।। 84

सोमे[22] पुरस्तादारभ्य मन्त्रेणैकादशं हुनेत् ।
आलयस्थापने चैव दिशाहोमं प्रशस्यते ।। 85

---

1. B पाठः, नीलो -A F, तीलो -C, 2. G पाठः, सूपोदनं -A, 3. विधोपभोगैश्च -G H, 4. सर्वसंपूर्णकं -C, सम्पूर्णसं -F, 5. विदिक्षुस्यादग्निकार्यं -B, 6. दिश्ये -G H, 7. C पाठः, कृत्वा -B H, 8. आग्नेये -F, 9. याम्येयं -F G H, 10. B पाठः, ग्निश्च -A, 11. कल्पकं -H, 12. नैर्ऋतिकल्पधर -F, नैर्ऋतिःकल्मषस्था - G, 13. B पाठः, गार्गस्पतिः -G H, वारुणाशा -A C E F G, 14. वायुः - F G, 15. दहनके -E F G, 16. C पाठः, कृत्वा -B, 17. B पाठः, रुद्रः तपन एव - A E F G, 18. ऊर्ध्वौ -F, 19. चैव अधरे - E F, 20 B पाठः, सुधा -A G, 21. धानाग्नि -G, 22. यो मे - G.

गृहस्थः स्थापयेदर्चां[1] गन्धपुष्पैः पृथक् पृथक् ।
आहवा जातवेदाश्च[2] दक्षिणा कल्मषस्तथा ॥ 86

गार्हपत्यो[3] वायुसखः दहनस्तपनश्च सः ।
स्वाहाप्रियः स्वधारामः[4] इत्येते अग्निनामकम्[5] ॥ 87

[6]संस्तवैर्वन्दनैःप्रार्थ्यैः[7]सर्वत्र ह्युपचारकैः ।
अनन्तो गरुडश्चैव विष्वक्सेनं स पादुकम् ॥ 88

परिवारगणोपेतमर्चयन्ति पृथक् पृथक् ।
मुद्रादिग्बन्धनञ्चैव पदविन्यासमावृतः ॥ 89

स्थपतिं स्थापकं चैव[8] सम्पूज्यं[9] भक्तितो गुणैः[10] ।
उभयोश्च[11] न तृप्तिस्याद्देवानां च न तृप्तिकृत् ॥[12] 90

स्थपतिर्पूजयेत् (पूजया ?)रिक्तः[13] स्थापकञ्च मृतो[14] भवेत् ।
स्थपतिस्थापकस्तृप्तौ[15] आयुश्रीवर्धनं भवेत्[16] ॥ 91

आचार्य[17]ऋत्विजां चैव उभयोः परिचारकैः[18] ॥ 92

---

1. स्थापनीयार्चां – C, 2. जातवेदाश्च –F, 3. गार्हपतिः – E F H, गार्हस्पतिः – G, 4. प्रियस्तथा –H, 5. इत्यग्निदशकं परं –B, 6. B पाठः, संस्तोत्रैः –A C E F G H, 7. सर्वात्राप्युप –C, सर्वत्रीण्युप –G, 8. स्थपतिस्थापकश्चैव –B, 9. सम्पूज्यौ –B, 10. B पाठः, शक्तिता गुणाः –A E F G, 11. उभयोर्चन –E G, 12. B पाठः, तृप्तये –A E F G H, 13. स्थपतिं –H, न पूजयेश्च स्थपतिं –B, 14. E पाठः, ततो –H. मृतको –A B. 15. तृप्तिः –C E G H, 16. C पाठः, वर्धतां भवेत् –A E, वर्धते सदा – B, वर्धताभवेत् –G, 17. C पाठः, भूतानां –A B, 18. C पाठः, परिवारकैः –A B.

सर्वैरपूपघृतशर्कर सङ्ग[1]मिश्रै-
स्सव्यञ्जनार्द्रविमलानि[2] फलानि तृप्त्यै
वस्त्रादि कुण्डलसुवर्णगवाश्वधान्यैः[3]
शय्यामहीनगरपत्तनखर्वटानि ॥ १३

त्नाङ्गुलीयकविभूषणहेमसूत्र-
केयूरबाहूवलयैः कटकैर्विचित्रैः ।
वस्त्रैर्दुकूलपटसञ्चलनै[4]र्विशेषैः[5]
गन्धादि पुष्पवनमालसमर्चयन्ति[6] ॥ १४

चतुर्थे दिवसे प्राप्ते[7] स्नपनं कारयेद्दिवा[8] ।
पश्चाद्धोमं समाधाय [9]अधिवासनवद्भवेत् ॥ १५

प्रतिष्ठाशेषमित्युक्त्वा आलये कल्पयेद्बुधः ।
आचार्ये[10] काञ्चनं दत्वा आचार्ये[11] द्विजभोजनम् ॥१६

इति श्रीपाञ्चरात्रे विहगेन्द्रसंहितायां तन्त्ररहस्ये
अगस्त्यप्रोक्ते श्रीसुदर्शनकल्पे
प्रतिष्ठाविधानो[12] नाम
पञ्चमःपटलः ।

u

---

१. सर्पि - B, संविमिश्रैः -G, २. B पाठः, संव्यञ्जर्नि (नं ?) त्रिविमलफलानि - A E F G H, सव्यञ्जनार्द्रविमलं -C, ३. गवाश्च -G, धान्ये -F G, ४.सञ्चदनै -G, ५. C पाठः, विचित्रैः -A, ६. B पाठः, मालिकया -A C E F, ७. व्याप्ते - F, ८. B पाठः, दिवं -A C E F G H, ९. C पाठः, ह्यधि - A B, १०. C पाठः, अवार्ये - A B, ११. C पाठः, अवार्ये - A B, १२. E पाठः, विधानं - A B.

षष्ठः पटलः

अम्बरीषः-

नमो मुनिवरस्तस्मै कुम्भयोने महामुने ।
देवताराधनं श्रेष्ठं श्रोतुमिच्छामि तत्वतः* ॥ 1

अगस्त्य उवाच -

देवार्चनक्रमं वक्ष्ये समाहितमना भव ।
नदीतटाके कूपे वा स्नातो नियतमानसः ॥ 2

धौत[1]वस्त्रोत्तरीयश्च[2] ऊर्ध्वपुण्ड्रधृतो भवेत् ।
मृण्मयं[3] चन्दनं बिल्वं भस्म[4]चेति चतुर्विधम् ॥ 3

ब्राह्मणस्य मृत्प्रोक्तं क्षत्रियस्य तु चन्दनम् ।
वैश्यस्य बिल्वकाष्ठं स्याच्छूद्राणां भस्मचोच्यते[5] ॥ 4

ऊर्ध्वपुण्ड्रं द्विजादीनां क्षत्रिस्यार्धचन्द्रकम् ।
वैश्यस्य[6] वर्तुलाकारं शूद्राणां च [7]त्रिपुण्ड्रकम् ॥ 5

पर्वताग्रे नदीतीरे बिल्वमूले च वाल्मिके ।
विष्णुक्षेत्रेऽथवा दिव्ये मृत्सङ्ग्रहणमाचरेत् ॥ 6

मृत्तिके हन मे पापं वेदान्तेषूपबृह्मिण(त?)म्[8] ।
शिरसाङ्गधृता[9] मृत्स्ना रक्षस्व मां पदे पदे ॥ 7

---

*श्लोकोऽयं केवलं G, H मातृकयोर्दृश्यते. 1. C पाठः, यौत - A B, 2. वस्त्रोत्तरीयं च -F, 3. G पाठः, 4. C पाठः, भस्म -A B G, 5. C पाठः, चोद्यते - A B, 6. B पाठः, वैस्यस्य -A; 7. तत्रि -F, 8. C पाठः, बृह्मणं - A B G, 9. धृतो -F G.

मस्तके कुक्षि हृदये कण्ठे दक्षिणपार्श्वयोः ।
वामपार्श्वेभुजे पृष्ठे पिठरे[1] केशवादिकम् ।। 8

सान्तरालमृजं(जुं ?)[2]सौम्यं द्वादशं विष्णुमन्दिरम् ।
कुक्षिहृत्पार्श्वयोगेषु[3] बाहुभ्यां च क्रमो भवेत् ।। 9

षडैतेऽष्टाङ्गुलं दीर्घं शेषाश्च[4] चतुरङ्गुलम् ।
रेखाणां[5] यवमात्रं स्यादन्तरालं त्रयङ्गुलम् ।। 10

धारणं[6] ब्राह्मणानां च जपहोमार्चनैरपि[7] ।
आयुरारोग्यरक्षार्थं अवश्यं लाञ्छनं[8] मतम्[9] ।। 11

पुण्यं पवित्रं पापघ्नं ऊर्ध्वपुण्ड्रं[10] धृतो[11] भवेत् ।
एवं धृतोर्ध्वपुण्ड्रःस्यादन्यथालमृतो भवेत् ।। 12

अङ्गरागैर्महागन्धैर्माल्यैर्वस्त्रैर्विचित्रितैः ।
रत्नाङ्गुलीयकैश्चित्रैर्भूषणैर्विविधैस्तथा ।। 13

हेमयज्ञोपवीतैश्च सोत्तर्यैः[12] क्षौमवाससैः ।
दुकूलैः सूक्ष्मवस्त्रैश्च उष्णीषमुखवाससैः ।। 14

कटकैर्वलयैश्चैव केयूरैः पट्टबन्धनैः ।
वस्त्राभरणमाल्यैश्च देवतावदलङ्कृतः[13] ।। 15

---

1. C पाठः, पीठरे – A B, 2. F पाठः, मृतुं –A, भुजं –B, 3. पार्श्वयोश्चैव – G H, 4. C पाठः, शेषाष्ट –A B, 5. C पाठः, रेखाणां –A B G, 6. धारणां –C, 7. जपहोमार्चनादिषु –G H, 8. वश्यं लाञ्छित –G, 9. C पाठः, मेव च –A B G H, 10. B पाठः, पुण्ड्रं – A E G H, 11. पुण्ड्रधृतो –G, 12. C पाठः, सोत्तरैः –A B G, 13. G पाठः, देवताभिरलङ्कृतं –A B.

सुभुक्तो वाप्यभुक्तो[1] वा कृतकृत्यश्च पूजकः ।
सपवित्रकरो दर्भैः[2] शुचिर्भूत्वा समाहितः ॥ १६

देवस्य दक्षिणे पार्श्वे पूजकस्य स्थितिर्भवेत् ।
तथैव जलपात्रं स्यात्पुष्पगन्धादिपात्रयोः[3] ॥ १७

वामे गण्डूषपात्रं [4]स्याद्दक्षिणे नैवेद्यपात्रकम् ।
गुरुं प्रणम्य पूर्वे तु गुरुपारम्परं स्मृतः ॥ १८

प्राणायामत्रयं कृत्वा मन्त्रन्यासपुरस्कृतः ।
ततःपीठं[5] समभ्यर्च्य मध्ये यन्त्रार्चनं भवेत् ॥ १९

[6]मन्त्रं वाथ महायन्त्रं विष्ठरं यन्त्रमुत्तमम् ।
चक्राब्जं वा समभ्यर्च्य तारमध्ये सदैवकम् ॥ २०

भस्मछन्नानले इध्मे सर्पिषा ज्वलनं भवेत् ।
बिम्बे संकोचिते[7] देवे मन्त्रेण विकसं भवेत् ॥ २१

सर्वभूतगतं विष्णुं मन्तमूर्तित्वमागतम् ।
समाहूय[8] स्वमन्त्रेण पूजास्व[9]भिमुखो भवेत् ॥ २२

देवमावाह्य विधिवत् परीवार[10]समन्वितम् ।
अस्त्रन्यासं ततो दिक्षु देवस्य परिरक्षणम् ॥ २३

मन्त्रासनं ततो स्नानं अलङ्कारं सभोजनम् ।
योगासनं तथा शेते षडैते देवतार्चनम् ॥ २४

---

१. B पाठः, अभुक्तो वा सुभुक्तो –G H, २. H पाठः, दर्भौ –A B, ३. पात्रकः –G, पात्रके –H, ४. H पाठः, स्यादग्रे –A B, ५. पीतं –F, ६. H पाठः, यन्त्रं –A B, ७. सङ्कोचने – C E G H, ८. B पाठः, भूय –A, ९. G पाठः, पूजाह्य –A E, पूजाद्य –C, पूजास्या –B, १०. परिवार – C E.

औपचारिकसांस्पर्शमभ्यवहारिकं तथा[1] ।
दर्पणं व्यजनं छत्रं चामरं स्वर्णपात्रकम्[2] ।। 25

धूपदीपं तथा कुम्भं[3] नृत्तवाद्यादि गीतिभिः[4] ।
योषितै[5]श्चातुरङ्गैश्च मात्रामुद्रानिराजनैः ।। 26

सर्वत्रादर्शितानां च[6] औपचारिकमुच्यते ।
तैलमुद्वर्तनं काष्ठं जलप्लोतं[7] स चूर्णकम् ।। 27

हरिद्रामलकं वस्त्रं गन्धमाल्यानुलेपनम् ।
यज्ञोपवीतभूषाद्यैरायुधानां तथैव च ।। 28

पादुकं वाहनं चैव सांस्पर्शिकमथाब्रवीत् ।
सूपोदनं तथा श्वेतं क्षीरोदनमथापि वा ।। 29

शुद्धोदनं[8] घृतान्नं च तिलान्नं कृसरं तथा।
पायसान्नमपूपादीन्[9] लाज[10]सक्तुफलादिभिः ।। 30

फलमूलादिकं[11] चैव ताम्बूलं च तथैव च[12] ।
आहारादिकं[13]सर्वमभ्यवहारिकमुच्यते[14] ।। 31

पत्रैःपुष्पाक्षतैर्गन्धैर्गन्धतोयैस्समर्चयेत् ।
एलालवम[15](ङ्ग?)खर्जूर(कर्पूर?)कस्तूरितगरं[16](अगरुं?)तथा ।।

---

1. मित्यपि - B, 2. G पाठः, पादुकार्पणपात्रयोः -A B, 3. दीपज्वलत्कुम्भ - G, 4. गीतयोः - A B, गीयते -C, 5. योषिद्भिः -C, 6. तं चेदं - H, 7. शिरःप्लोतं -H, 8. H पाठः, गुलोदनं -A B, 9. H पाठः, पायसान्नं च पूपादीन् -A B, 10. राज -H, 11. मूलाष्टकं-G, 12. B पाठः, कर्पूरनिशिताम्बुकं -A. 13. गृहारामादिकं -G, 14. B पाठः, सर्वं च मा - A E, सर्वं चाभ्यव -C, 15. लवङ्ग - B E, 16. तकरं -E F, नगरं -G, तगरुं -H.

यो यथा चन्दनं चैव कर्पूरनिशिथाम्बुकम् ।
कुमुमागरुभिर्गन्धैर्मृगनाभिस्तथैव च ।। 33

फलजातिकतक्कोलं[1] गन्धद्रव्यमिहोच्यते ।
तद्भावो जपकाले तु आज्ञाकाले[2] तथैव च ।। 34

तर्पणार्चनहोमं स्यादुपास्योपासभाविनः[3] ।
पञ्चपात्रं समादाय मध्ये शुद्धोदपात्रकम् ।। 35

आग्नेयकोणे संस्थाप्य अर्घ्यार्थं गन्धवारिणा ।
नैर्ऋत्यां पाद्यमित्युक्त्वा वायव्याचम्य पात्रकम् ।। 36

ऐशान्यां स्नानपात्रं स्याद्द्रव्याणि[4] विविधानि च ।
पात्राणि प्रणवं न्यस्य[5] मूलमन्त्राष्टकं जपेत् ।। 37

अभिमन्त्रे(न्त्र्ये ?)ति सर्वेषां पात्राणि च पृथक् पृथक् ।
जलपुष्पं गन्धपात्रे[6] रक्षणास्त्रं न्यसेद्दिशाः ।। 38

शोषणादीनि विन्यस्य चक्रसौरभदर्शयेत् ।
पुनः स्पृश्य बलै[7]र्मन्त्रैः पात्राणि च पृथक् पृथक् ।।39

अर्घ्यं हस्तस्य संदद्यात्पाद्यं पादस्य विन्यसेत् ।
मालाबाहुशिरो न्यस्य धूपं[8] नासान्तमेव च ।। 40

दीपं नेत्रान्तमुद्धृत्य नैवेद्यान्तमुत्थितम् ।
घटिपञ्चमसंवेष्ट्यं[9] देवीं सायुधवाहनाम्* ।। 41

---

1. तत्काल - C F, तक्कोल -G, 2. पूजाकाले -G, 3. H पाठः, पास भावनः -G, 4. द्रव्याणां -E F, 5. G पाठः, प्रवणं न्यस्य -F, 6. F पाठः, रक्षणार्थं -A B, 7. बलो -A B, 8. C पाठः, सूपं -A B E F, 9. B पाठः, संवट्य -A, *V. 40 B to 42 B पर्यन्तविषयाः नष्टाः -G.

परिवारावरणोपेतं चक्राकारं तु वेष्टयेत्[1] ।
आसनावाह्य पाद्यं च अर्घ्याचमनवाससम्[2] ।। 42

मन्त्राङ्गं न्यासमुद्रां च ताम्बूलं च तथैव च ।
इति मन्त्रासनस्यान्तं नियमाः[3](मो?)परिकथ्यते ।। 43

पादुकं दर्पणं चैव दन्तकाष्ठमतःपरम् ।
जिह्वानिर्लेखगण्डूष[4]माचम्य मुखवाससम्* ।। 44

ताम्बूल[5]स्नानवस्त्रं च तैलमुद्वर्तनं तथा ।
वस्त्रोत्तरीयगन्धाद्यैर्भूषणं वनमालकम्[6] ।। 45

छत्र[7]चामरदिव्याङ्गं तालवृन्त[8]मथापि वा ।
आदर्शधूपदीपं च नीराजनमथाक्षतम् ।। 46

मात्र[9]मुद्राप्रदर्श[10] च अलमाराणि[11] षोडश ।
अर्घ्यादिकस्त्रयं[12] भूयो मधुपर्कनिदर्शनम् ।। 47

नैवेद्यमुपहारांश्च मोदकादि फलैरपि ।
अथोपपन्ननैवेद्यं देवस्याग्रे निधाय च ।। 48

चक्रसौदर्शन[13]गायत्री नैवेद्यपरिषेचनम् ।
अर्घ्योदकेन सम्प्रोक्ष्य शोषणाद्यभिमन्त्रितः[14] ।। 49

---

1. निवेष्टयेत् -B H, 2. वाससा - B, 3. H पाठः, इं नवमाः -A B, 4. निर्लेखनं चैव गण्डूषं -H, *V. No. 43 & 44 in between mater होमं बलि प्रदानं च परिवारार्चनं तथा -H, 5. F पाठः, तांबूलं -A B, 6. C पाठः, मालिकां -B. 7. C पाठः, चित्र -A B, 8. तालवृन्दं -G 9. B पाठः, मातृ -A C, 10. B पाठः, प्रदेशं - F, 11. षोडशः -G 12. अर्घ्यास्त्रैय्यं भूयो -G 13. C पाठः, सन्दर्शन -A B, 14. मन्त्रितं - F.

बलमन्त्रेण सजप्त्वा अस्त्रं न्यस्य दिशो दश ।
ग्रास[1]मुद्रेण संगृह्य चक्रसारभदर्शनम् ॥ 50

मूलमन्त्रं पुरस्कृत्वा मधुवातेत्यृचं जपेत् ।
उपपानं ततो दद्यादास्यान्तोत्थितभोजनम् ॥ 51

आचम्य हस्तगन्ध[2] च ताम्बूलं मुखवाससम् ।
होमं बलिप्रदानं च परिवारार्चनं तथा ॥ 52

उदकाञ्जलिना[3] राजन् भोज्यानां षोडशस्मृतः ।
नृत्तगीतमृदङ्गाद्यैः वीणावेणुश्च मङ्गलैः* ॥ 53

स्तोत्रं प्रदक्षिणं चैव प्रार्थनं वन्दनं तथा ।
आत्मयागं कृते राजन् योगमर्चनमेव[5] च ॥ 54

शयनासनं तु समल्प्य पीठार्चनमतःपरम् ।
देवीनामष्टशक्तीनां गन्धमाल्यैस्समर्चयेत्[6] ॥ 55

दिव्यायुधाष्टकानर्च्य परिवारेण संवृतम्[7] ।
अनन्तगरुडं चैव विष्वक्सेनं सपादुकम्[8] ॥ 56

---

1. B पाठः, न्यास – A, 2. गन्धहस्तं – H, 3. F पाठः, उत्काञ्जलि – A B, 4. H पाठः, ञ्जलिमाराजन् –A B, *V. No. 53 श्लोकानन्तरं विद्यमानविषयः

ततःप्लोतं साष्टमंस्यादसाभ्याग(सौभाग्याग?)चूर्णकम् ।
हरिद्रामलकं वस्त्रं क्षालनं ब्रह्मसूत्रकम् ॥
पवित्रस्तिलकाचाममभिषेकं . . . . !
शिरोमार्जनवस्त्रं च चतुर्विंशाभिषेचनम् ॥ हंसपादे – G,

5. H पाठः, यागार्चन दशैव तु – A B, 6. समर्पयेत् –G, 7. H पाठः, सर्वतः – A B, 8. पातुकं – E F.

चक्रैकादशमूर्तीनामर्चयेत्तत्पृथक् पृथक् ।
अर्घ्यादि[1] सप्तकं कुर्यान्मोदकादि निवेदकम्[2] ॥ 57

ताम्बूलमुखवासं च शयनासनमर्पणम्[3] ।
मुद्रादिग्बन्धनं चैव द्वारान्[4] पश्चायुधाचनम्[5] ॥ 58

शय्यासनार्चनविधिं त्रिंशश्च परिकथ्यते ।
मानसैःकायिकैश्चापि अद्भिर्वा अग्निरेव वा[6] ॥ 59

सूर्यमण्डलमध्ये वा सोममण्डलमेव वा[7] ।
चक्राब्जं बालयन्त्रं वा बिम्बे वा नित्यमर्चयेत् ॥ 60

सिकतैः स्थण्डिलैश्चापि मण्डलैर्वा विशेषतः ।
काचित्कदा[8]चिद्देवेशं ध्यानपूर्वमतन्त्रितः ॥ 61

द्यौर्वायुरग्निरापश्च पृथिवीं पञ्चधाचनम् ।
जपध्यानमिदं व्योमप्राणायामेव[9] वायवम् ॥ 62

होममाग्नेयकं चैव आप्यं जलगते जपम् ।
अवगाहस्तर्पणं च[10] शेषाःपार्थिवमुच्यते ॥ 63

एवं पञ्चविधं प्रोक्तं मन्त्रसाध्यमनुत्तमम् ।
श्रेष्ठं पञ्चविधं[11] पूजा होमान्तं मध्यमं तथा ॥ 64

---

1. मध्या(ध्वा?) -H. 2. भिनिवेदकं -G. 3. तर्पणं -F. 4. F पाठः, न्वाग... A B, 5. पश्चायुधानपि - H, पश्चायुधार्चनं - A B. 6. C पाठः [illegible] वा - B. 7. G पाठः, मण्डलमेव वा - A. 8. [illegible] - C H. 9. प्राणायामे [illegible] 10. आवाहनं तर्पणं च - G. 11. विधा - C.

क निष्ठं जपमात्रं स्यात् पूजा[1] पञ्चाङ्ग उच्यते[2] ।
जपतर्पणहोमं[3] स्यात् पुष्पाञ्जल्यन्नदानकम् ।। 65

पञ्चाङ्गोपासनं पूर्णं[4] यथाशक्तिरुपासकः[5] ।
अग्नौ तिष्ठति विप्राणां हृदि तिष्ठति योगिनाम् ।।66

प्रतिमास्वप्रबुद्धानां[6] उपास्यं[7] त्रिविधं भवेत् ।
नित्यं नैमित्तिकं काम्यं इति त्रिविधमर्चनम् ।। 67

नित्यं नित्यार्चनं चैव नैमित्तं गृहसङ्क्रमम् ।
काम्यं षट्कर्मकं शान्तिं ग्रह[8]रोगनिवारणम् ।। 68

काम्यराधनवैषम्यपञ्चाङ्गं विविधानि च ।
तिलशर्करसंमिश्रं अपूपं मधुसंयुतम् ।। 69

नित्यमष्टोत्तरशतमष्टाविंशतिकं हुनेत् ।। 70

कल्हारपमजपलाशसुगन्धिजाति-
बिल्वादि पाटलमशोकसुचम्पकानि ।
अन्यानि सौरभविशिष्टविचित्रितानि
अष्टाधिविंशतिशतद्दशकानि(शतं कुसुमानि तानि?)[9]।।71

पक्वानिक्षीरोदधिमध्वकसर्पिषाणि-
वस्त्राणि सूक्ष्मवनमालविचित्रितानि ।
प्रज्वाल्यमग्निविधिनानि(स?)तिलानि पुष्पैः
मध्वानि [10]रम्भपनसाम्रफलादि[11]रन्यैः ।। 72

1. C पाठः, पूर्णं – A B G H, 2. मेव च –B, 3. E पाठः, होमः –A B, 4. C पाठः, पूर्वं –A B, 5. C पाठः, रुपासकं –A B H, 6. G पाठः, प्रतिष्ठासु प्रबुद्धानां –A B, 7. H पाठः, उपास्यां –A B, ८. E पाठः, गृह – A B G, 9. शतद्दशकानि रूप–G, शतेतद्दशकानि–H, 10. C पाठः, रंह–A B, 11. फलानि– H.

हुत्वा निशाम्बुमृगनाभिसचन्दनानि
कर्पूरकुमुमगरुश्च सुगन्धितानि ।
एवं विधैव[1] विधिनानि विपश्चितानि
दैवे समर्पय भवेदिह सर्वकामान् ॥ 73

इति श्रीपाञ्चरात्रे विहगेन्द्रसंहितायां तन्त्ररहस्ये
अगस्त्यप्रोक्ते श्रीसुदर्शनकल्पे
समाराधनविधानो नाम
षष्ठःपटलः ।



1. विधाय - C.

सप्तमःपटलः

अम्बरीषः-

अगस्त्यमुनिशार्दूल प्रणा(णौ?)मि शिरसा सदा ।
चक्रबिम्बस्य वैशेषं प्रमाणं कथयस्व मे* ॥ 1

अगस्त्यः[1]-

अथ वक्ष्ये विशेषेण चक्रराजस्य लक्षणम् ।
अनिमित्तनिमित्तं स्याल्लोके बिम्बं[2] द्विधा भवेत् ॥ 2

द्वारवत्यां[3] हरिक्षेत्रे सालग्रामे च या शिला ।
अनिमित्तं महाबेरं सर्ववर्णेषु[4] योग्यकम् ॥ 3

अवशिष्टा[5]न्त्यजानां च सर्वेषां पूजनीयकम् ।
अन्येषां मत्क्रिया केचिन्निमित्तं[6] कथ्यते बुधैः ॥ 4

सुवर्णं रजतं ताम्रं शिला दारु च[7] मृण्मयम् ।
पटभित्तिकमेवं स्याद्यथादेशं यथोदयम् ॥ 5

येन केनापि तद्द्रव्ये मनोवाक्कायकर्मणि[8] ।
तस्य स्मरणमात्रेण देवतासन्निधि[9]र्भवेत् ॥ 6

वापीकूपस्थले कुर्याद्यथातोयं समुद्भवम्[10] ।
तथैव प्रतिमारूपं कारयेल्लक्षणान्वितम् ॥ 7

---

* G मातृकायाः स्वीकृत्यात्र योजितम् , 1. अगस्त्य उवाच -H, 2. G पाठः, लोकबीजं - E, 3. G पाठः, द्वारवती - A B, 4. वर्णे तु - F, 5. अवसिष्टा - C E G, 6. G पाठः, केचित्तन्मूर्तं -A B, 7. C पाठः, दारुज -A B, 8. कर्मयुक् - G H, 9. C पाठः, सन्निधौ-A B, 10. G पाठः, तोय-B, समुद्भव-A, समुद्भवः-C.

स्फटिकं दर्पणं चैव वर्णरूपं प्रदर्शितम्[1] ।
तथैव प्रतिमां कुर्याद्दिवतासन्निधौ[2] भवेत् ।। 3

यजमानवशात्कुर्या[3]द्गृहार्चैरालयेपि वा ।
[तस्य बिम्बोत्थिता[4] कुर्यात्[5] कर्त्राङ्गुल्या नियोजयेत्[6] ।।

तत्तदङ्गुलिसंख्यानामायाति शुभदर्शनम् ।
[7]यजमानदक्षिणं हस्तं मध्यमाङ्गुलि[8]मध्यमे ।।

पर्वदीर्घं ततं वापि मात्राङ्गुलमिहोच्यते ।
अङ्गुलीनां त्रिभिर्वृद्धं अष्टकैस्मृत[9]योनिकम् ।।

ध्वजो धूमस्तथा सिंह्मः श्वा वृषो गर्दभःकरी ।
काक इत्युच्यते योनिः सा शुभा शुभलक्षणा ।।

ध्वजस्सिंह्मो गजोऽनड्वान् शुभयोनिश्शुभावहा ।
धूमः(क?)काकःखरश्वानः प्रतिकूल[10]वियोनयः ।।

चतुरो वृद्धिदं कुर्यान्नवमैर्हृत[11]मंशकम् ।
तस्करो भुक्तिशक्ती च[12] धन्यो नरपतिःक्लिबः ।।

निर्भीतिःप्रीतिरायुष्मानेते कंशा(सा?)स्समीरिताः ।
अष्टकैर्वर्धते चैव द्वादशैर्भूत[13]मायकम् ।।

---

1. प्रदर्शकं - G H, 2. सन्निधिः - G H, 3. 1.G पाठः, कुर्युः -A B, 4. त्थया - H. 5. H. पाठः, ङ्गुल्य - G 6. कत्राङ्गुलानि योजयेत् - G 7. यजमानं - H, 8. त्यङ्गुलि(च ?) - H, 9. हृदयो - H, 10. कूलाहि - H, 11. नवमे धृत - H, 12. शक्तीव - H, 13. स्मृत - H.

नवमैर्वृद्धिदं कुर्याद्दशमैस्सूतकं प्रियम्[1] ।
आयस्समग्रशुभदो व्ययस्स्वल्पशुभावहः ॥

[2]प्रतिकूलविपर्यासे ग्रामादेरशुभं भवेत् ।
अष्टभिर्वर्धते[3] धृत्वा सप्तविंशति ऋक्षकम् ॥

नवभिर्वृद्धिदं कुर्यात्सप्तभिर्हतवारकम् ।
वाहनायुधशय्यां च बेराणां क्लपयेद्बुधः ॥

यस्य बिम्बप्रमाणस्य तस्यायामं चतुर्गुणम् ।
पञ्चकं पञ्चकं सूत्रं पूर्वाग्रमुदग्रकम् ॥

तत्तु सार्धेन भागं स्याच्चक्रवृत्तं प्रकल्पयेत् ।
चक्रषट्कोणकं बिम्बं तदायामोच्छ्रयं बुधः ॥

दण्डैश्च वल्कलैस्सूत्रैः कर्कटे दीर्घपत्रके ।
बेरावसानकरणमेषां कुर्याद्विचक्षणम् ॥]*

षण्मानोक्तविधानेन स्थानकालीढकेऽपि वा ॥ 9

मानं प्रमाणमुन्मानं परिमाणोपमानकम्[4] ।
लम्बमानमिति ज्ञेयं षण्मानं कथ्यते बुधैः ॥ 10

मानेत्युत्सेधसंज्ञां[5] च प्रमाणं विभजेऽष्टधा ।
उन्मानमन्तरछिद्रं परिमाणेतिनामकम्[6] ॥ 11

---

1. दशमे हृतकं मयं – H, 2. प्रतिकूले – H, 3. वृद्धये – H, *G H मातृकयोः स्वीकृत्यात्र योजितम् , 4. B, पाठः, पातकं – A, 5. संज्ञं –G , 6. नाहकं –H.

भूषायुधोपमानं च लम्बसूत्रेतिलम्बकम् ।
इत्येवं षड्विधं प्रोक्तं बेरं कुर्याद्विचक्षणः[1] ।। 12

बिम्बोत्सेधेति [2]षट्पञ्चषोडशांशैकविस्तरम् ।
घनमर्धसमं वाथ त्रिकोणं सम्पुटीकृतम्[3] ।। 13

अन्वयव्यतिरेकेण षट्कोणं समसम्पुटम्[4] ।
पादादुष्णीशसीमान्तमूर्ध्वाधःकोणमेव च ।। 14

ऊर्ध्वपट्टं स्तनादूर्ध्वमथाजानुरधस्तथा[5] ।
स्तनजानुसमं [6]कुर्याद्बाह्ये वृत्तं विशेषतः ।। 15

त्रिगुणं चतुर्गुणं वापि बेरादेकांशनेमिकम् ।
चक्रस्य मध्ये स्थूलाभमन्तर्बाह्ये च सूक्ष्मकम् ।। 16

मध्ये स्थूलमुभौ पार्श्वे[7] सोपानक्रमसूक्ष्मकम् ।
तच्चक्रं सप्तधा कृत्वा सप्तांशं[8] क्रमशो भवेत् ।। 17

षट्कोणस्य च[9] तद्बाह्ये वृत्तमेकाशकं भवेत् ।
घनं षट्कोणवत्कुर्याल्लम्बधाम विचित्रितम् ।। 18

तद्बाह्ये वृत्तमेकांशं घनमर्धादिकं भवेत् ।
वज्रजालै[10]रलमृत्य दलं च परिकथ्यते ।। 19

---

1. C पाठः, विचक्षणं - A B G. 2. G . पाठः, षट्पट्टं - A, 3. G पाठः, भवसंपुटं - A B, 4. G पाठः, भवसंपुटं - A B, 5. G पाठः, मजोन्मानमधस्तथा -A B. 6. G पाठः, वापि - A B, 7. G पाठः, पार्श्वौ - A B, 8. G पाठः, सप्तांशे - A B. 9. तु - G 10. H पाठः, शालै - A B.

अर्धांशं कम्पकं बाह्ये सार्धांशमधिकं घनम् ।
महावृत्तविभागं स्यात् [1]सममायामविस्तरम् ।। 20

वेत्रं वृत्ताकृतीरेव[2] महावृत्तं प्रशस्यते ।
पुष्पजालैरलमृत्य मणिमा(जा?)लैरलमृतम् ।। 21

तद्बाह्ये कम्पमर्धांशं[3] पूर्ववत्परिकल्प्यते ।
तद्बहि[4]र्वृत्तमेकांशं केसरो[5]ऽयं प्रशस्यते ।। 22

दलमेव च तत्कुर्याद्वज्रजालैरलमृतम् ।
तद्बाह्ये वृत्तमेकांशं घनं षट्कोणमब्रवीत्[6] ।। 23

अष्टोत्तरसहस्रंस्याच्छतमष्टोत्तरं भवेत् ।
ज्वालामालासमायुक्तं[7] चतुर्ज्वालोन्नतं भवेत् ।। 24

अथवा अष्टज्वालं स्याद्भागं तद्द्विगुणीकृतम् ।
ज्वालैरनेकसंयुक्तं महाज्वालं विना भवेत् ।। 25

सामं दलं च कम्पं स्यान्महावृत्तं च कम्पकम् ।
केसरज्वालपङ्क्तिस्यात् सप्तांशैर्नामतःक्रमात् ।। 26

अथवा कम्पभागैकं चतुर्थांशं प्रचक्रमेत् ।
भागस्य भागयोर्मध्ये कम्पं[8] कुर्यात्पृथक् पृथक् ।। 27

---

1. सप्त -E, 2. वृत्ताकृतेरेव - H. 3. C पाठः, मध्यांशं -A B, 4. तद्बाह्ये - G
5. F पाठः, एकांशकेसरो - A B, कोसरो - E, 6. मन्त्रवत् - G. 7. E पाठः,
युक्तः - A B C, 8. एवं - A B

सुषिरस्सुषिरं[1] वापि ज्वाले माले च धामके ।
महावृत्तमुभौ पार्श्वे अन्तर्बाह्ये मुखं भवेत् ।। 28

चक्रमन्तर्मुखं त्रीणि वृत्तं त्रीणि बहिर्मुखम् ।
इति चक्रप्रमाणं स्याद्भूयो बिम्बं वदाम्यहम् ।। 29

आलीढं प्रत्यगालीढं स्थानकं वा भवेद्बुधः ।
आलीढं वामपादाग्रमुत्तराभिमुखस्थितः ।। 30

स्थित्वा दक्षिणपादाग्रं दक्षिणाभिमुखो भवेत् ।
प्रत्यालीढमिदं चैव बाहूनां च विशेषणम् ।। 31

भुजषोडशकं वाथ द्वात्रिंशद्वा यदृच्छया ।
[2]वटवृक्षशिफाकारो बाहूनां निम्नगं[3] भवेत् ।। 32

हस्तकोर्परसंस्थानं वक्त्रं बन्धूक[4]कण्टवत् ।
हस्तानाञ्चोभयोः पार्श्वौ तालपत्रविकासवत् ।। 33

अष्टका वा द्विरष्टं[5] स्याद्वाहु[6] द्वात्रिंशमेव वा ।
चितुष्षष्टिभुजं वापि अष्टाविंशच्छतं भवेत् ।।] *

पूर्वहस्तावुभौ पूर्वे निर्गमं सौम्य तत्समम् ।। 34

बेरोत्सेधोऽष्टभागं स्यात्पादः पाण्यायुधो भवेत् ।
पादस्य पादयोश्छिद्रं[7] चतुर्भागं भवेद्बुधः ।। 35

---

1. सुषिरं निस्सुषिरं -B G, निष्ठुरं -H. 2. फल -H. 3. निर्गमं - G. 4. बन्धूल-C G H, 5. C पाठः, द्विरष्ट-A B, 6. H पाठः, वा बाह्य - G. स्याद्बाह- A E. *हG, मातृकायाः स्वीकृत्यात्र योजितम् , 7. E पाठः, श्चिद्र-A B.

कटि[1]कोर्परयोस्सन्धौ भागमेकं प्रकल्प्येत् ।
मणिबन्धहस्तहस्तौ एकभागं क्रमाद्भवेत् ॥ 36

अमुशं पद्महस्तौ च पद्मं चापं च पार्श्वयोः ।
द्विभागमन्तरं चैव हस्तहस्तौ पृथक् पृथक् ॥ 37

इति षोडशहस्तःस्याद्द्वात्रिंशद्धस्तकं भवेत् ।
बेराच्छोडशभागैकं हस्तयोर्हस्तमन्तरम् ॥ 38

चतुष्षष्टिभुजं कुर्यादर्धं हस्तं च हस्तयोः[2] ।
तदूर्ध्वे हस्तकं कुर्याद्यथा शोभं भवेद्बुधः ॥ 39

द्विभागं जानुजान्वोश्च[3] शिरोज्वालं[4] द्विभागिकम् ।
तस्य[5] द्विभागयोर्मध्ये संगृह्य भ्रामयेद्बुधः ॥ 40

वृत्तादूर्ध्वं द्विभागं[6] स्यादूर्ध्वजालं समध्यमम्[7] ।
तिर्यगूर्ध्वं द्विसूत्रं स्यात्काकपादेव[8] मध्यमे ॥ 41

तिर्यक्सूत्रं द्विभागान्तं ज्वालाग्रारभ्य सूत्रधृक्[9] ।
मध्येस्थूलमुभौ[10] पार्श्वे ज्वालं त्रित्रिचतुर्ष्वपि[11] ॥ 42

सूत्रपर्यन्तज्वालाग्रं यवमात्रं च नाभ(भि?)कम् ।
मूलादारभ्य ज्वालानां सूत्रनेत्रसमं भवेत् ॥ 43

---

1. कक्षि - C E F, 2. तदर्धं हस्त हस्तयोः - H, 3. जानोश्च - B, 4. ज्वाला - B, 5. तत्र - B G, 6. त्रिभागं - B G, 7. समर्धमं - B, 8. G पाठः, कायादेव - A B, 9. सूत्रयुक् - B G, सूत्रकं - H, 10. मुभे - C, 11. चतुष्ककं - H.

धामावसानकं पादौ[1] बाह्यकंपे च केसरौ ।
ज्वालावसानौर्ध्वज्वालौ शिरोज्वालावसानकम् ॥ 44

शिरोज्वालं चक्रशोभं किञ्चिद्धसित[2]पद्मवत् ।
आलीढे वामनासाग्रे प्रत्यालीढे[3] च दक्षिणे ॥ 45

ऊर्ध्वाधः[4]कोणहृदये सूत्रपातं तथैव च ।
जानुमध्यं द्विभागं स्यात्पञ्चधा विभजो भवेत् ॥ 46

[5]सूत्रात्पूर्वे त्रिभागं[6] स्याद्द्विभागमपरे तथा ।
इत्येवं क्रमशः कुर्यादालीढस्य विशेषणम्[7] ॥ 47

आलीढं स्थावरे कुर्याज्जङ्गमे स्थानकं भवेत् ।
आभङ्गं समभङ्गं स्यात्त्रिभङ्गं भङ्गमेव च ॥ 48

समभङ्गेति कुर्वीत चक्रराजे विशेषतः ।
पीठं वा उपपीठं वा पीठोक्तविधिना भवेत् ॥ 49

त्रिभागं पद्मपीठं स्यादधःपद्मं द्विभागकम् ।
ऊर्ध्वपद्मैकभागं स्यात्कर्णिकाक्षेत्रक[8]द्वयम् ॥ 50

अधः[9]क्षेत्रं त्रिभागं स्यात्षट्कोणायावसानकम्[10] ।
आलीढस्य च पादौभौ पादासारैक[11]पट्टिका ॥ 51

---

1. धामावसाने कम्पादौ - H, 2. H पाठः, किञ्चिद्धस्ति - A E F G, किंश्चार्धसित - B, 3. प्रज्वालीढे - F, 4. C पाठः, ऊर्ध्वोत्थ - B, 5. C पाठः, सूत्रान् -A B G, 6. द्विभागं - E, 7. विशेषणः - B, 8. क्षेत्रका - E, 9. E पाठः, अथ - A B, 10. कोणाग्रा - B H, कोणावा - G, 11. धारैक - G

षडङ्गे दीर्घमुत्सेधं अर्धांशे विस्तरेण च ।
द्विसिह्मौ द्वीपके(पिने?)वा[1] व्याले[2] द्वे च शिरोपरि ।।

पद्मपीठस्युभौ[3] पार्श्वे व्यालं कुर्याद्बहिर्मुखम् ।
पीठं पट्टिकयोर्मध्ये सिह्मपादयुगं भवेत् ।। 53

आभिमुख्यकरौ सिह्मौ[4] पट्टिकाधारयापयेत् ।
पादं सूत्रप्रमाणं स्याद्यथा शास्त्रं प्रकल्पयेत् ।। 54

मानहीने महद्दुःखमधिके शत्रुवर्धनम् ।
[5]तस्मान्मानसमं[6]कुर्याद्राजराष्ट्राभिवर्धनम् ।। 55

यथा हृद्यं यथाचित्रं यथा शोभं यथा [7]दृढम् ।
यथा दृष्टिर्यथाशास्त्रं तेषामन्वीकृतं बुधः[8] ।। 56

मूर्तिं चक्रैकरूपं[9] स्याद्द्विधा[10] रूपं न कारयेत् ।
बिम्बद्विधाकृतं दोषं तस्य देहं भवेद्बुधः ।। 57

पूर्वभागमिदं कृत्वा अपरान्तं तथैव च ।
अथवा अब्जमेवं स्यादपराङ्गेति सर्वतः ।। 58

विशालदलपत्रं स्याज्ज्वालानेमिं सनाभिकम् ।
अष्टचत्वारपत्रं स्यादक्षराणां पृथक् पृथक् ।। 59

---

1. H, पाठः, द्विशिभे वा द्विपद्मे वा - A B, 2. B पाठः, व्याल - A, 3. G पाठः, ह्युभौ - B, 4. आभीमुखे कराबिम्बौ - B, 5. G पाठः, तत्तस्मात् - A B E, 6. मानसं - B, 7. भ्रमं - B, 8. तथा - H, 9. रूपस्य - F, 10. स्योद्विधा - E,

निरक्षराब्जकं कुर्यात्पूर्वभागैक[1] चित्रकम् ।
षट्कोणमध्ये चक्राब्जं कारयेन्नाक्षरं विधम् ।। 60

चतुर्विंशच्छोडशाष्टावराणां क्रमशो बुधः ।
एभिर्दलं केरसं(केसरं?)स्यादरं नेमिज्वलावलिम्[2] ।। 61

नाभिरेकांशकं मध्ये बाह्ये द्व्यंशं दलाष्टकं ।
द्विभागं केरसं(केसरं?)प्रोक्तं तद्बाह्ये[3] ज्वालमन्तरम् ।।62

चतुर्ज्वालं द्विभागं स्याच्चक्राब्जस्य च लक्षणम् ।
दलानामन्तरं न्यस्य अक्षरा(र?)न्यासमारभेत्[4] ।। 63

केवलामब्जमेवं स्यादब्जमध्ये सतारकम् ।
यत्र देवस्थिते[5] यन्त्रं पादपीठस्य कल्पयेत् ।। 64

बालयन्त्रं महायन्त्रं सुदर्शन नृसिह्मकम् ।
महाभूतं मण्डलान्तमथवा पार्थिवे तथा ।। 65

आिधारयन्त्रमेवस्यान्नृसिह्मानुष्टुभे तथा ।*

क्षीमदष्टाक्षरं मन्त्रं वाराहं वाथ वामनम् ।
यस्य यन्त्रस्थितो देवः सर्वाभीष्टफलप्रदः[6] ।। 66

पुष्पाकारं[7] सुवृत्तं[8] वा आयुधाकारमेव वा ।
सर्वं चक्रेशदेवाय[9] मन्त्रशास्त्रादिकं भवेत् ।। 67

1. भागे तु - H. 2. B, पाठः, ज्वलावली - A, ज्वलावर्ली - E. 3. तद्ब्रह्मे - F, षड्बाह्ये - H, 4. B पाठः, समारभत् - A C E, 5. देवे स्थिते - B, *वाक्यमिदं G पाठान्मूले निवेशितम् , 6. B पाठः, प्रदा - A, 7. B पाठः, सुष्पाकारं - A E, 8. F पाठः, सुमवृत्तं - A B, 9. B पाठः, देवोऽयं - A C E F G H.

सर्वेषां देवतारूपं मनसानुस्मरेत्सुधीः ।
देवानां शिरसा धार्यं कराग्रे विष्णुना धृतम्[1] ।। 68

बाह्वोर्धृते[2] मनुष्यानां ब्राह्मणेभ्यो विशेषतः ।
व्रणस्फोटमहाग्रन्थिमच्छेद्यं दहति व्रणम्[3] ।। 69

तेनैव [4]पापसच्छेद्य(द्यं ?)चक्रतापेन[5] निर्भयम् ।
सर्वेषां धार्यते चक्रं वधूनां कण्ठसूत्रवत्[6] ।। 70

द्विजानां वेदशास्त्रं स्याच्छिखायज्ञोपवीतवत् ।
आरोग्यं जयसौभाग्यमायुर्मोक्षकरं शुभम् ।। 71

लाञ्छितं विष्णुसम्प्रीतिं [7]चक्रशङ्खधृतो भवेत् ।
ज्योतिश्चक्रं तथाकालस्सूर्यचक्रमथैन्दवम्[8] ।। 72

कुलालचक्रविभ्राम्यं[9] सर्वचक्रमयं जगत् ।। 73

इति श्रीपाञ्चरात्रे विहगेन्द्रसंहितायां [10]तन्त्ररहस्ये
अगस्त्यप्रोक्ते श्रीसुदर्शनकल्पे
चक्रलक्षणो[11] नाम
सप्तमःपटलः ।



---

1. धृतः – H, **2. बाह्वोद्धृते** – E, **धृतो** – C, **3. छेद्यं दहति निर्व्रणं** – H, **4. कामान्** – G, **5. चक्रतापेन** – G, **6. सूत्रकं** – H, **7. प्रीतिचक्र** – C, **8.** C **पाठः, मथेन्दिवं** – E, **मथा** – F, **9.** B **पाठः, विभ्राम्य** – A, **चक्रमिव भ्राम्यं** – G, **चक्राढ्यं** – H, **10. मन्त्र** – G, **11. मूर्तिचक्रलक्षणो** – C G H.

अष्टमःपटलः

अथातस्सम्प्रवक्ष्यामि दिक्चक्रस्य च लक्षणम् ।
पूर्वादि दशदिक्षु स्यात्परितोऽप्येक(ऽनेक?)मूर्तयः[1] ।। 1

द्विभुजश्चतुर्भुजो वापि अष्टबाहुभिरेव वा ।
दिशासु पूरिताकारं दानवानां भयमरम् ।। 2

मध्याह्नभास्करं तेजस्सर्वायुधधरं परम् ।
सर्वत्र हस्ते बिभ्रुयाच्चक्रमम्बुजमेव वा[2] ।। 3

एकमूर्तिर्द्विमूर्तिर्वा चतुर्मूतिस्तथैव च ।
जपाकुसुमसमाशमष्टबाहुं त्रिलोचनम् ।। 4

दंष्ट्राकरालवदनं भीषणं भूषणान्वितम्[3] ।
गमनाकारसंयुक्तं ज्वालामालाभिरावृतम् ।। 5

जया च विजया चैव ऐन्द्रादिक्पालमूर्तयः ।
आग्नेयां दिशिमूर्तीनां द्वाभ्यां चत्वार एव वा[4] ।। 6

[5]सर्वात्रामुशचक्राभिर्बाहुभिश्च विराजितम्[6] ।
पूर्ववद्देवतारूपं ज्वलत्पावकसन्निभम् ।। 7

जिता पराजिताख्येयाग्निदिक्चक्रमूर्तयः ।
याम्यदिक्चक्रमूर्तीनां द्वाभ्यां चत्वार[7] एव वा ।। 8

---

1. C पाठः, मूर्तये - A, 2. च - C G, 3. भूषणं भीषणान्वित - B G H, 4. ५ -G, 5. सर्वमङ्कुर - G, 6. विराजितः - H, 7. C पाठः, च द्वार - B.

बाहुस्सवेत्र बिभ्रुयाच्चक्रं [1]तोमरमेव च ।
पूर्ववल्लक्षणोपेतं तप्तकाञ्चनसन्निभम् ।। 9

अप्रतिहता प्रतिहता याम्यदिक्चक्रमूर्तयः ।
नैर्ऋत्यां दिशिमूर्तीनां[2] बाहुस्सर्वत्र चक्रधृक् ।। 10

स्थानकालीढके वापि पूर्ववल्लक्षणान्वितम् ।
अनपायानपाख्येयं [3]पद्मरागसमद्युतिम्[4] ।। 11

वारुण्या चक्रमूर्तीनां [5]बाहवश्शङ्खचक्रधृक् ।
विक्रमाविक्रमाख्येयं[6] ज्वलनार्कसमद्युतिः[7] ।। 12

वायुदिक्चक्रमूर्तीनां गदाचक्रधरं तथा ।
वीरवीराभिधा[8]ख्येयं मणिविद्रुमसन्निभम् ।। 13

उत्तरां दिशिमूर्तीनां पाशचक्रधरं तथा ।
उग्रउग्राभिधा[9]ख्येयं [10]शक्रगोपसमद्युतिः[11] ।। 14

[12]ऐशान्यां चक्रमूर्तीनां चापचक्रधरंस्तथा ।
घोरघोरार्ति[13](ता)ख्येयं प्रवालमणिसन्निभम् ।। 15

[14]ऊर्ध्वं[15]दिक्चक्रमूर्तीनां खड्गं चक्रधरं तथा ।
भीम[16]भीमाभिधाख्येयं[17] विद्युत्सदृशवर्चसम् ।। 16

---

1. चक्रतोमर – E G, 2. G पाठः, दशमूर्तीनां – A B, 3. C पाठः, यत्र – A, चक्र – B, 4. द्युति – F, 5. बहवः – C, 6. माख्येये –C, यत् – H, 7. C, पाठः, पुरावपि – A B G H, 8. भिदा – F, 9. भिदा – F, 10. चक्रमोसत्तम – F, चक्रगोपसम –H, 11. द्युर्ति – B G H, 12. B पाठः, ईशान्यां – A E H, 13. B पाठः, खोरखेरा – A C E, भिधाख्येयं – G H, 14. ऊर्ध्वा – B G, 15. B, पाठः, धृक् – A, 16. B पाठः, भीता – A E, 17. B पाठः, भिराख्येयं – A C E.

अधो[1] दिक्चक्रमूर्तीनां हलं चक्रधरं तथा ।
जपाकुसुमसमाशं चण्डचण्डाभिधा[2]ख्यया ॥ 17

सर्वतो दिशिचक्रं स्याद्बाहुषोडशभिस्स्मृतः[3] ।
सर्वत्र चक्रं [4]बिभ्रुयादन्यत्रायुधकं विना ॥ 18

चण्डप्रचण्डमाख्यातं महोल्कायसमावृतम्[5] ।
भूयोऽपि[6] कथ्यते मूर्तिः[7] द्वाविंशन्नामधेयकम् ॥ 19

वर्णायुधं च पूर्वेण दिशां चैव महामते ।
भीषणं[8] भीषणं पूर्वे[9] अथ[10] भैरवभैरवम् ॥ 20

याम्ये भद्रं अभद्रं स्याज्ज्वल प्रज्वल नैर्ऋते ।
दह प्रदह[11] वारुण्ये पच[12] प्रपच वायवे ॥ 21

छिन्द छिन्दाख्य(दक?)कौबेरौ[13] ऐशान्ये भिन्दभिन्दक ।
भञ्जभञ्जोर्ध्वदिक्चैव ग्रसग्रसवध[14]स्तथा ॥ 22

त्रासय त्रासयस्सर्वे[15] पूर्वादि क्रमशो बुधैः ।
एष देवान् समभ्यर्च्य पश्चाद्देवं[16] समर्चयेत् ॥ 23

पूर्ववल्लक्षणोपेतं[17] चक्रषट्कोणकेसरम् ।
सहस्रारशतारं वा[18] चक्रराजो विशेषतः ॥ 24

---

1. C पाठः, अथो – A B, 2. भिदा – F, भिधाख्ययं – H, 3. B पाठः, स्मृत – A C F, 4. B पाठः, सिभ्रायात् –A E, 5. समावृतः – B, 6. B पाठः, भूयोऽरि A C E F, 7. मूर्तिं – C E G, 8. भाषणं –F. 9. पूर्वं – A C F. 10. कथं –B C. 11. B पाठः, भ्द्रौ व्रतभ – A C E, भद्रौ रतभ – F, 12. पश्च – B, 13. F पाठः, कौबेरी – B G H, 14. वध – F, 15. B पाठः, पूर्वे – A, 16. G पाठः, दैवं – A. 17. लक्ष्मणोपेतं – F, 18. G पाठः, सदारं – A C E F, सनारं – H

दशादिक्चक्रमूर्तीनां चतुष्षष्ट्यारमेव च ।
अष्टचत्वारिकं वापि चतुर्विंशतिमेव च[1] ॥ 25

अपराङ्गस्य षट्कोणस्यान्तरे चक्रपमजम् ।
मध्यमे पूर्वभागे तु देवदेवं सुदर्शनम् ॥ 26

इतीव परिवारं स्याच्चक्रमूर्तिविशेषणम् ।
अरं दलं केसरं स्याज्ज्वालमित्यभिधीयते ॥ 27

इति श्रीपाञ्चरात्रे विहगेन्द्रसंहितायां तन्त्ररहस्ये
अगस्त्यप्रोक्ते श्रीसुदर्शनकल्पे
दिक्चक्रमूर्तिलक्षणो नाम
अष्टमःपटलः[2] ।



---

1. वा B, 2. B पाठः, परिच्छेदः – A.

नवमःपटलः

अम्बरीष उवाच -

पितामहमनोद्भूत मलयाद्रिनिवासिने ।
कथं चक्राब्जमन्त्रोऽयं कथयस्व सविस्तरम् ।। 1

अगस्त्य उवाच -

चक्राब्जमन्त्रं वक्ष्यामि अष्टचत्वारपत्रके ।
चतुर्विंशच्छोडशाष्टौ अन्तस्तद्यन्ततो भवेत् ।। 2

इन्द्रादिकत्रयं कृत्वा अष्टदिक्षु[1] त्रयस्त्रयः ।
पूर्वादिक्षु[2] स्मृतिर्यस्य[3] उत्तरारकमारभेत् ।। 3

मध्यमारं ततःकुर्याद्दक्षिणारमनन्तरम् ।
पुरुषशब्दं चतुर्थ्यन्तममर्षणविराम च ।। 4

इत्येवं पूर्वदिग्बन्धं द्वादशाक्षरकं भवेत् ।
ऐन्द्रीं दिशं ततोद्धृत्य चक्रेण सह बन्धनम् ।। 5

स्वाहा शब्दं पुरस्कृत्य ओं[4] नमश्चक्रमित्यपि ।
चतुर्थी हुं पडित्येव स्वाहान्तं तदनन्तरम् ।। 6

इत्येवं क्रमशो बध्वा प्रत्यरे द्वादशाक्षरान् ।
याम्यां दिक्ष्वक्षरकं त्रीणि वारुण्यां च तथैव च ।। 7

सौम्यमाग्नेयकोणेषु अरेषु द्वादशाक्षरान् ।
नैर्ऋत्यां वायुदिग्भ्यां[5] च ऐशान्यां क्रमशो न्यसेत् ।। 8

---

1. अष्टकेषु G, 2. पूर्वदिक्षु - G H, 3. स्तृतीयस्य - B, 4. ओं - H, 5. दिश्यां - C F.

ऊर्ध्वाध[1]दिक्षु सर्वत्र त्रीणि दिग्बन्धनं विना ।
प्रत्येकमब्जंस्त्रिकुर्या[2]च्चतुर्ज्वालसमन्वितम्[3] ॥ 9

चक्राष्टाक्षरकं[4] कुर्याच्चतुर्ज्वालकमेव च ।
स्थले कुर्याद्दिशे(शां?)पूर्वे स्थानकोर्ध्वं ततो भवेत् ॥

अक्षरारम्भकं कुर्यादरेषु ज्वालकेषु च ।
इत्येवमब्जकं कुर्यादक्षराणां विशेषणम् ॥ 11

अन्तर्ज्वालं[5] षोडशके[6] नवाक्षरं पृथक् पृथक् ।
तदस्त्रिरष्ट[7]पत्रेषु[8] अक्षराणां पृथक् पृथक् ॥ 12

प्रणवं नाभि[9]मुद्धृत्य पश्चाद्ब्राह्मो न्यसेद्बुधः ।
पद्मस्य पश्चिमदले न्यासस्यादी[10]स्तथैव च ॥ 13

पद्मस्य पश्चिमानादिस्तथैव पुनः पुनः ।
सकारश्च छकारश्च[11] सुकारश्च तथैव च ॥ 14

हकारश्च नकारश्च चकारःप्रथमे दले ।
सकारश्च मकारश्च ककारश्च[12] तथैव च ॥ 15

नकारश्च[13] तथाकारो[14] राकारश्च द्वितीयके ।
हुंकारश्च विकारश्च सुकारश्च तथैव च ॥ 16

---

1. C पाठः, ऊर्ध्वाथ - B E F G, 2. स्त्री - C F, कुर्याच्च - H, 3. F पाठः, ज्वालासमन्वितं - A B, 4. C पाठः, चक्राष्टाक्षरं इति न्यूनैकाक्षर पाठौ - A B, 5. E पाठः, अन्तर्जलं - A E, ज्वालं च इत्यधिकाक्षर पाठः - B, 6. षोडशकं - G, 7. तदिसतर - B, 8. पत्रे तु - F, 9. B पाठः, नाम - A, 10. न्यासस्यादेः - H, 11. स्थकारश्च - G H, 12. C पाठः, सुकारश्च - A, 13. यकारश्च - B, रकारश्च - G, 14. तथाकारा - B, कारो - E F.

फट्कारश्च चकारश्च भाकारश्च[1] तृतीयके ।
ओंकारश्च[2] शिकारश्च अकारश्च तथैव च ॥ 17

सकारश्च खकारश्च चतुर्थे तद्दले[3] भवेत् ।
चकारश्च तथा स्वाचयैकारश्च[4] तथैव च ॥ 18

[5]क्राकारश्चैव भाकारः [6]पकारःपञ्चमे दले ।
स्थकारश्च शिकारश्च फट्कारश्च तथैव च ॥ 19

स्वाकारश्च रकारश्च [7]ओं च षष्ठदले स्मृतः ।
हकारश्चैव सोकारो सूकारश्च तथैव च ॥ 20

[8]दृभृत्कारस्वास्यकारौ[9] विज्ञेयास्सप्तमे दले ।
दकारश्च विकारश्च[10] पकारश्चैव[11] केवलम्[12] ॥ 21

स्वकारश्चैव[13] ओंकारश्चक्राकारस्तथैव च ।
बन्धयामि च कारासीद्द्वितीयारे नवाक्षराः[14] ॥ 22

न्यत्रानेह[15] चकारश्च द्याकारौ[16] च तथैव च ।
लकारश्चाप्यकारश्च[17] प्रथमारे नवाक्षराः ॥ 23

स्वकारश्च धकारश्चक्रकारश्च[18] तथैव च ।
बन्धयामि यकारासीदद्वितीयारे नवाक्षराः ॥ 24

---

1. B पाठः, भाकारश्च - A C E G H, 2. कारौ च - B G, 3. तु दले - B, 4. B पाठः, येकारश्च - A, 5. आकारश्चैव - H, 6. वकारः - H, 7. G पाठः, औषः - B, ऊषः - A E, 8. G पाठः, दृगुष्कारः - A, उग्रकार - B, 9. कारौ च - B, कारो - A, 10. H पाठः, भकारश्च - A, 11. B पाठः, चकारश्चैव - A C E F G H, 12. B पाठः, केवलः - C, केवला - G, 13. F पाठः, कारं - A B E G, 14. G पाठः, नवाक्षरः - B, नवाक्षरं - A, 15. न्यक्रानेह - H, न्यक्रारेह - G, 16. E, पाठः, घकारौ - A B, 17. यकारश्च - B G H, 18. चक्राकारः - H.

हकारश्च तथाश्वास भ्याकारश्च तथैव च ।
बन्धयामि सिया(श्रिया?)चक्रे[1] तृतीयारे नवाक्षराः ॥25

[2]वहावौयामि[3]कारश्च दिंकारश्च[4] तथैव च ।
[5]क्रमाकारा च [6]विज्ञेया चतुथरि नवाक्षराः[7] ॥ 26

वकारश्चप्यकारश्च [8]पणिकारौ तथैव च ।
ओंकाकारनकारश्च[9] पञ्चमारे हि यौ[10] तथा ॥ 27

शास्त्राकारौ तथोंकारौ अकारश्च तथैव च ।
धकारश्च मकारश्च तसौ षष्ठे[11] नवाक्षराः[12] ॥ 28

यकारश्च तुकारश्च[13] आस्वाकारं[14] तथैव च ।
[15]नोकारश्चैव भाकारो सप्तमारे नवाक्षराः ॥ 29

हुं फट्कारौ[16] च रुग्मे च याकारौ च तथैव च ।
क्रिंनिकारौ[17] तथोंकार[18]श्चाष्टमारे नवाक्षराः ॥ 30

---

1. सियावाच - A C E F, 2. पहापौ - B, 3. यासि - E, 4. C पाठः, दीकारश्च - B, दींकारश्रौ - G, 5. चक्रमाकार - H, 6. B पाठः, विज्ञेयाः - E, जया -F, 7. नवाक्षरं - C E F, 8. विणी -B, षणि - C, 9. काराराथकारश्च - F, ओंकारश्च तकारश्च - H, 10. मिधौ - B, 11. षष्ठेन - E F, विष्टेन - B, 12. B पाठः, नवाक्षरं - H, 13. C पाठः, चुकारश्च - A B E H, चकारश्च - G, 14. E पाठः, आस्वाकारं - A C G H, 15. तोकार - H, 16. B पाठः, षट् - A, 17. कृकारौ - G, 18. काराः - E.

ओंकारौ चक्रकारौ च नेकारश्च[1] तथैव च ।
स्वस्वामिवर[2] चक्रार[3] नवमारे नवमारे नवाक्षराः।। 31

[4]मध्वारौ च यकारश्च साकारौ च तथैव च[5] ।
परिकारौ क्रकारश्च दशमारे नवाक्षराः ।। 32

हाला स्वाहा मकारश्च मन्यकारौ तथैव च ।
नकारश्चैव एकारौ नवैकादशमाक्षराः ।। 33

सौरभ्या[6]मर्षकाष्टैश्च सर्व[7]कारस्तथैव च ।
हे प्रकारौ[8] हिकारश्च द्वादशारे नवाक्षराः ।। 34

न क्राममर्षर्णींकारां[9] साकारो[10] हि तथैव च ।
[11]यौकारश्च तथोंकारं त्रयोदशनवाक्षराः ।। 35

शकारश्च यकारौ च षकारश्च[12] तथैव च ।
एसकारौ[13] सकारश्च हर्दनाश्चतुर्दशः ।। 36

एस्वानौ[14] सहकारश्च सहस्राकारौ तथैव च ।
साकारश्च[15] मकारश्च [16]नवपञ्चदशाक्षराः ।। 37

---

1. फकार - H, 2. स्वासवाधिवर - B, स्वस्स्वामि - G, 3. चकारश्च - B G, चक्राच्च - F, 4. B पाठः, मन्धरौ - A, मज्वरौ - H, 5. साकारश्च चतुर्वच 6. सुह्या - B. 7. F पाठः, सर्ष - A B E, सष - G, 8. E पाठः, प्रवारौ - A B, वह प्रकारौ - G, 9. मर्षणोंकारां - C, 10. B पाठः, सकारो - A E G, 11. B पाठः, पोकारश्च - A, 12. विकारश्च - B, 13. एकसंकारौ - B, एवं करौ - G H, 14. H पाठः, स्वानं -A, सवानं - B, 15. सकारश्च -G, 16. B पाठः, नच - A.

शकारश्च यकारौश्च[1] षकारश्च तथैव च ।
ससभा[2] सहकारश्च बजाकारौ तथैव च ॥ ३८

ओंकारश्च चकारश्च षोडशारे नवाक्षराः ।
क्राकारश्च यकारश्च स्वाहाकारौ तथैव च ॥ ३९

पश्चिमारग्रमारभ्य ज्वालासु क्रमशो न्यसेत्[3] ।
इत्येवमुद्धृतो मन्त्रैस्साङ्गोपाङ्गस्सुदर्शनः ॥ ४०

इति श्रीपाञ्चरात्रे विहगेन्द्रसंहितायां तन्त्ररहस्ये
अगस्त्यप्रोक्ते श्रीसुदर्शनकल्पे
चक्रबजमन्त्रोद्धारो नाम
नवमःपटलः ।



---

१. विकारश्च - B. २. सचमा - F, सचभा - B E G, ३. C पाठः, रसेत् - A B.

दशमःपटलः

अम्बरीष उवाच -

अगस्त्याय नमस्तुभ्यं चुलुकोदकसागरम् ।
शृणोमि सर्वतत्वार्थं भूय इच्छाम्यहं मुने ॥ 1

सुदर्शनस्य मन्त्रस्य ऋषिरासीत्[1] कपर्दिनः ।
सारूप्यमभवत्सार्धं कथयस्व[2] महामुने ॥ 2

अगस्त्य उवाच -

[3]ऋषिर्नारायणःपूर्वे परमात्मा स्व(च?)देवता[4] ।
पश्चाल्लब्धो महादेवश्चक्रमन्त्रं पुरश्चरात् ॥ 3

[5]तपश्चरं महाघोरं क्षीराब्धेस्तटमुत्तमम् ।
षडक्षरं चक्रविद्यां त्रिदिवं हायनश्छतम्[6] ॥ 4

पश्चात्प्रसन्नौ[7] चक्रेशो वरं दत्वा महाद्भुतम्[8] ।
तत्र[9] प्रीतमना विष्णुश्चक्ररूपी जनार्दनः ॥ 5

आविर्बभौ महातेजाः सहस्रादित्यसन्निभः ।
मुनिभिस्सनकाद्यैश्च [10]सेव्यमान(नै?)श्च वन्दिभिः ॥6

[11]सवाहनस्सशक्तिश्च सपरीवारसंयुतम् ।
किरीटमकुटोपेतं सशिखा सप्तकोज्ज्वलम् ॥ 7

---

1. B पाठः, रासौत् - A , 2. G पाठः, कथयामि - A B, 3. ऋषे - B, 4. देवता - B G, देवतः - F, 5. श्चरान् - B, 6. B पाठः, हानय - A C G नयश्चकं - H, 7. एवं प्रसन्नौ - H, 8. महद्भुतं - C, 9. अत्र - C E F, 10. सेव्यमानस्तु - G H, 11. सवाहनं - B, सवाहन - G.

[1]कण्ठावतंसग्रैवेयं [2]झषकुण्डलसंयुतम् ।
हारकौस्तुभमुक्ताढ्यं [3]बाहुभिश्च विराजितम् ॥ 8

बाहुपूरितपुष्पाढ्यं वलयैर्कटकैर्युतम् ।
रत्नाङ्गुलीयकैश्चित्रैः हेमयज्ञोपवीतकैः ॥ 9

[4]मणिकाञ्चिसमायुक्तैः लम्बदामाभि[5]चित्रितैः ।
दिव्यपीताम्बरधरं किमिणीमणिशोभितम् ॥ 10

नूपुरैः पादसारैश्च[6] वीरमुद्रादि शोभितैः ।
आपादलम्बितैश्चित्रैर्घण्ठामालविभूषितैः[7] ॥ 11

श्रीवत्सकौस्तुभोरस्कं पुण्डरीकायतेक्षणम् ।
दंष्ट्राकरालवदनं भीषणं भूषणान्वितम् ॥ 12

ज्वालामालासमाभूत्वा[8] ज्वालेनज्वालमुद्भवम्[9] ।
तत्तज्वालै[10]र्दशो दिक्षु दीप्यमानमहोज्ज्वलम् ॥ 13

इत्येवं चक्रराजोऽयं रुद्रस्यं पुरतो भवेत् ।
तद्रूपं ददृशे शूली अतिसम्भ्रान्त[11]चेतसः ॥ 14

यावत्प्रदक्षिणाकारमास्फोटनमहाभुजम् ।
नर्तयन्नाटयन्गाय[12]न्नुद्ययन्पतयन्भुवि ॥ 15

---

1. कर्णावतंस – B G, 2. झषत् – G H, 3. बाहवश्च – G, 4. काञ्चि – B, काञ्ची – C G, 5. दामाभिः – C, 6. H पाठः, शारैश्च – A, 7. माला – H, 8. कृत्वा – B, समाग्रत्वात् – H, 9. मुत्तमं – B, 10. C पाठः, ततः ज्वालैः – A B, 11. B पाठः, रविं विभ्रान्त – A C E F, 12. C पाठः, गायन्नुधं च – A B.

[1]ह्लादयं[2]चोदयं[3]स्तूयन्प्रणा(ण ?)मन्धारयन्दिवि ।
इत्येवं सम्भृतो[4] रुद्रो[5] एकयामं मुहुर्मुहुः ॥ 16

तं पश्यं[6] दूरतः[7] स्थित्वा कृताञ्जलिरभाषत ।

रुद्र उवाच[8] -

देवदेव महादेव[9] सुदर्शनमहाप्रभो ॥ 17

ममदृष्टिह्यदृष्टोऽयं[10] महांशुज्वालतेजसम् ।
वेदान्ते[11] मुनिभिर्देवैः मनसातीतगोचरम् ॥ 18

अनेन[12]जन्मतपसा अल्पयत्नेन लब्धितम् ।
अद्य मे सफलं जन्म सुप्रभाता च मे निशा ॥ 19

कृतार्थोऽस्म्यनुगृहीतोऽस्मि धन्योऽस्मि कृतवानहम् ।
मद्दृष्टिदर्शितार्थाय पर्याप्ता फलतेजसम् ॥ 20

पर्याप्तं भवतत्तेजत्वत्समीपे निवेशनम् ।

भगवानुवाच -

ततःप्रसन्नो भगवान्महातेजास्सुचक्रराट् ॥ 21

स्वाभाविकसहस्रास्ते तेजस्संछाद्य[13]वन्महान् ।
दशा[14]समभवत्तेजमितरं छादयन्महान् ॥ 22

---

1. B पाठः, हासयन् - A C F, विन्दयन् - H, 2. रोदयन् - E G, 3. C पाठः, स्रुद्यन् - A B, 4. सम्भ्रतो - B, 5. G पाठः, रौद्रा - A B, 6. पश्य - B, पश्यत् - G, 7. B पाठः, तरतः - A C E F, 8. C पाठः, रुद्रः - A B G, 9. F पाठः, तेजः - A B, 10. B पाठः, ह्यदिष्टोऽयं - A E, 11. वेदान्तैः - B, 12. F पाठः, अनेक - A B, 13. C पाठः, छाब्द - A F, च्छिब्द - B, संछादयन् - H, १४. दृशा -G.

एभि(हि?)शम्भो महाप्राज्ञ यथाकामं[1] ब्रवीषि[2] मे ।

रुद्र उवाच[3] -

समाहितमना[4] भूत्वा दृष्टिभ्यां समपश्यत ।। 23

अत्र पूर्णमना रुद्रः प्रहृष्टो वाक्यमब्रवीत् ।
पूर्वे बलामहादैत्याः [5]वरदर्पसमन्विताः ।। 24

अयो[6] वर्णैश्च रूप्यैश्च त्रिपुराण्याकृतिर्महान्[7] ।
महाविमानैःप्रासादैः वप्रप्राकार[8] गोपुरैः ।। 25

आपण्यवीथिकाद्यैश्च नानाचत्वरसंयुतः ।
सर्वसम्पूर्णितै[9]श्शोभैर्गन्धर्वनगरोपमान् ।। 26

इत्येवं महिमा[10]दिव्यैस्त्रिपूराख्यं महाबलम् ।
मद्भक्तभावनार्थेन लोकसंहारकारकः ।। 27

देवतानां च सर्वेषां मत्समीपे कृतं[11] महान् ।
आयुमेव पुरो जघ्नुरस्माकं हितकाम्यया ।। 28

सर्व(र्वान्?)देवऋषिं(र्षीं?)चापि[12]वचः श्रुत्वा दहाम्यहम् ।
तस्य दानवनाशार्थमुपायबलपौरुषम् ।। 29

त्रेधा [13]दैतेयनगरं एकधा कुरुते भवान्[14] ।
सारूप्यं [15]सबलं तेजः वृणीष्व सुमहाध्वरे[16] ।। 30

---

1. कारं - G, 2. ब्रवीमि - B, 3. रुद्रः - B G, 4. C पाठः, मनो - A B F, 5. दान - G, 6. B पाठः, अथो - A, 7. C पाठः, पुराण्याकृतिं महान् - A B, महान्शब्दानन्तरं 'पूर्वे' इति पदमपि अधिकतया दृश्यते A मातृकायां, 8. B पाठः, प्रासाद - A, 9. सम्पूर्णतैः -B, 10. दित्यैः - F, 11. F पाठः, कृशं - A B C E G H, 12. B पाठः, सर्वाय देवर्षींचापि - A C E, 13. G पाठः, तैतेय -A B, 14. B पाठः, हवान् -A C, 15. सफलं -B, 16. सुमहदध्वरे - B.

सर्वाण्यस्त्राणि शस्त्राणि तच्छरीरे [1]समुद्भवाः(न्?) ।
प्रवर्तकनिवर्ताख्य[2]मायुधानां चतुर्विधम् ॥ ३१

इत्यस्त्राणां महानासीदघोरं कामरूपकम् ।
अस्माकं ददते देव अशेषाण्यस्त्रनायक ॥ ३२

श्रीभगवानुवाच[3] –
कृपया परयाविष्टो प्रसादं कुरुते महान् ।
यत्र यत्र च कामानि तत्र तत्र भविष्यति ॥ ३३

गृहीत्वा पूर्णमना रुद्रः प्रहृष्टो वाक्यमब्रवीत् ।
चन्दनादि सुगन्धादीन् पुष्पाणि विविधानि च ॥३४

दिव्याम्बरं शुभं देवी दिव्याभरणमेव च ।
त्वदीयमेव तत्सर्वमन्यत्राणान्न कारयेत् ॥ ३५

[4]तपोवेषं करिष्यामि जटाचर्माम्बरो भवेत् ।
सर्वाभरणभस्माङ्गबाह्य[5]पुष्पाणि[6] पत्रकैः[7] ॥ ३६

जपध्यानसमाधिं[8] च नारायणपरोऽस्म्यहम् ।
इत्येवं व्रतसङ्कल्प्य इतःपश्चात्करोम्यहम् ॥ ३७

अन्त[9]र्धानङ्गतश्श्रीमान् चक्ररूपीजनार्दनः* ।
उग्रं वीर्यं महातेजं बलदर्पसमन्वितम् ॥ ३८

---

१. समुद्भवां – C, २. C पाठः, निवृत्याख्यं – A, नृत्ताख्यं – E F, निवृत्यर्थं – B, ३. E पाठः, भगवानुवाच – A B, ४. तेषां –F, चेष्टं – B, ५. बाह्यं – B, ६. पत्राणि – C, ७. पुष्पकैः – C, ८. ध्यानसमाधिं – B, ९. ध्यान – H, * V. No. 38 पूर्वार्धस्यानन्तरं B मातृकायां विद्यमानश्लोकः – उग्रं वीर्यं महातेजं प्राप्तुशक्तिमशेषतः। त्रिपुरं जघ्नुषुः पश्चात्तृणीकृतजगत्त्रयम् ॥ श्लोकोऽयं A C E F मातृकासु न दृश्यते.

लोकपालसमत्वं हि अधिकं बलदर्पकम् ।
लोकं संहारयामास[1] निगृह्येहनिरीक्षणम्[2] ।। 39

साक्षाद्भगवतस्तेजः उद्धार्यं बलपौरुषम् ।
अतिवेलमहोग्रेण सर्वक्षयकरं भवेत् ।। 40

दुर्निरीक्ष्यं महातेजं त्रिदशां मुनिनामपि ।
महेन्द्रश्चिन्तयामास उपेन्द्रो वाक्यमब्रवीत् ।। 41

रौद्रतेजं बलं स्मृत्वा समाभेदक्रमेण तु ।
इन्द्रस्य[3] वचनं श्रुत्वा करिष्यामि प्रयत्नतः ।। 42

सोभ्यगच्छन्महातेजाः कैलासशिखरे गिरौ ।
किमरं दर्पहरणं[4] किं कार्यं कीदृशं भवेत् ।। 43

उपेन्द्रो भगवांस्तत्र मुहूर्तमपि चिन्तयन् ।
उपासकस्त्वतभवद्रु[5]द्राय[6] प्रियकारणात् ।। 44

जपहोमार्चनाद्वन्द्यैस्स्तोत्रैश्शुभकरैश्शुभैः ।
प्रसन्नोऽहं महातेजा यत्राभीष्टफलोऽब्रवीत् ।। 45

युष्मश्छक्र[7]बलोवीर्यतेजश्शक्तिं ददाम्यहम् ।
वचः श्रुत्वा करिष्यामि दत्वा रौद्रेण शार्ङ्गिणम् ।। 46

---

1. पालयामास – G, 2. निरीक्षणात् – G H, 3. चन्द्रंस्य – B, 4. B पाठः, किं किं दर्वहणं – A E, किं कन्दर्पहरणं –G, 5. त्वत्रभवत् – B, 6. रुद्रस्य – G, रुद्राय – H, 7. अष्टचक्र – H.

चक्रवीर्यबलं तेजो दोग्ध्री[1] धेनुक्रमेण[2] च ।
तच्छक्तिं भगवत्तेजं दुग्धा गौरिव गच्छति ॥ 47

शमरं चिन्तयामास समाहितमनाऽऽभवत् ।
ज्ञानदृष्ट्यैव दृष्ट्वाथ विष्णुमायाबलोद्धृतम् ॥ 48

भूयस्तोत्रैर्महातेजा ज्ञानरूपी वृषध्वजः[3] ।

रुद्र उवाच -

नमस्ते चक्ररूपाय निमस्सुदर्शनाय च ।
नमस्ते नेमिनाथाय पवित्रवपुषे नमः ॥

वरुणाय नमस्तुभ्यं बृहन्नाथ नमोनमः ।
नमस्ते दीप्तरूपार्ये* ज्वालामालाय ते नमः ॥ 49

घण्ठामालनमस्तुभ्यं[4] उग्ररूपाय ते नमः ।
मां पालयस्व देवेश प्रणतार्तिप्रभञ्जन[5] ॥ 50

निमो रथाङ्गवपुषेऽसुरान्तकनमो नमः ।**

नमस्ते वासुदेवाय नारायण जगत्पते ।
अणोरणुश्च महते विष्णवे परमात्मने ॥ 51

जितन्ते पुण्डरीकाक्ष नमस्ते गरुडध्वज ।
नमस्ते जगतान्नाथ नमो भगवते हरे ॥ 52

---

1. दोग्घ्रि - C, 2. रुमेव - C E F, 3. B पाठः, वृषध्वज - A, *आवरणचिह्ने विद्यमानविषयः A मातृकायां नास्ति । सर्वास्वन्यासु परिदृश्यते । 4. मालानमस्तुभ्यं - B, 5. C पाठः, प्रपश्चन - A B, **विषयोऽयं केवलं A मातृकायां नास्ति ।

सृष्टिस्थित्यन्तकरण[1] नमस्समल्पकल्पित ।
त्वयि मे लोकपालत्वं लोकसृष्ट्येतिकल्पितम् ।। 53

त्वय्येव लोकधृतये त्वयि सर्वं प्रतिष्ठितम् ।
त्वां विना भूतसर्वत्र तिलतैलेन मिश्रितम्[2] ।। 54

प्रसन्नोऽहं महाविष्णु:(णो ?)प्रसादं कुरु पूर्ववत् ।
त्वामाश्रित्य महद्यत्नं निष्फलं हि महान्हरे ।। 55

प्रसीद देव देवेश पुण्डरीकायतेक्षण ।
इत्येवं बहुधास्तोत्रैः मनोवाक्कायते परम् ।। 56

स्तोत्रैःप्रीतमना विष्णुः वरं दास्यामि शाश्वतीम् ।

भगवानुवाच[3] -

प्रसन्नोऽहं भवानस्मि[4] इति पूर्वं वचोऽब्रवीत् ।। 57

ऋषित्वं कल्पिते शम्भुरितःपश्चाद्भविष्यति[5] ।
अस्य मन्त्रस्य साध्यस्य साधकानां च लक्षणम्[6] ।। 58

इत्येवमाह भगवान्वासुदेवो जगत्पतिः ।
लोके विख्यापयामासुश्चक्रमन्त्रं सविस्तरम् ।। 59

अपेक्षावस्थितं चक्रं भविष्यति न संशयः ।
केशवस्य वचःश्रुत्वा प्रणिपत्य महीतले ।। 60

कृतार्थोऽस्म्यनुग्रहीतोऽस्मि पूर्णकामोऽस्मि माधव ।
अन्तर्धानगतश्श्रीमान्शङ्खचक्रगदाधरः ।। 61

---

1. B पाठः, कारण – A, 2. विश्रुतं – C E G, ति विश्रुतं – H, 3. भगवान् –B G
4. वरावस्मि – F, 5. भविष्यसि – G, 6. B पाठः, पृक्षणं – A.

भूयोऽपि प्राप्यते स्वर्गं देवानां पूजनं महत् ।
इत्येवमाह पूर्वेण ऋषित्वं शम्भुना[1] भवेत् ॥ 62

पश्चात्तद्दिनमारभ्य अहि[2]र्बुध्न्य ऋषिस्तदा ।
अहिर्बुध्न्यसंहिताख्येयं नारदाय श्रुतं भवेत् ॥ 63

ऋषींश्च[3] देवानस्माकं[4] नारदेन वचोऽब्रवीत् ।
रूपं लक्षणसम्भेदमशेषेण वदाम्यहम् ॥ 64

श्रावयेत्परमं गुह्यं वेदशास्त्राणि विस्तरम् ॥ 65

इति श्रीपाञ्चरात्रे विहगेन्द्रसंहितायां तन्त्ररहस्ये
अगस्त्यप्रोक्ते श्रीसुदर्शनकल्पे
ऋषिनिर्णयो नाम
दशमःपटलः ।



1. C पाठः, शंशना – A B, 2. C पाठः, हहि – B, 3. G पाठः, ऋषिश्च – A B,
4. C पाठः, देवास्माकं – B.

एकादशःपटलः

अम्बरीष उवाच[1] -

भगवन्मुनिशार्दूल कुम्भोदरसमुद्भव ।
श्रोतुमिच्छाम्यहं वन्दे मन्त्रन्यासविधिं शुभम् ।। 1

अगस्त्य उवाच -

मन्त्रन्यासं प्रवक्ष्यामि शृणु राजन्महामते ।
चक्रमन्त्र[2]ऋषिश्शम्भुर्गायत्री[3] छन्द उच्यते ।। 2

दैवतं परमात्मानं रकारं बीज उच्यते ।
हुं कारं शक्ति[4]वर्णोक्तिरभीष्टे[5]विनियोगतः ।। 3

आचक्राय विचक्राय सुचक्राय शिखावषट् ।
सूर्यचक्राय ज्वालाय महासुदर्शनमस्त्रकम् ।। 4

मन्त्राक्षरादौ संयोज्य अक्षरान्षट्क्रमो भवेत्[6] ।
हृदयाद्यङ्गषट्कं स्यान्मन्त्राक्षरपुरस्सरम्[7] ।। 5

हृच्छिरश्च शिखानेत्र[8] कवचास्त्रक्रमो भवेत् ।
स्वाहा पल्लविताङ्गेषु षडङ्गं कथ्यते बुधैः ।। 6

मातृका मन्त्रसंयोज्यं मातृका क्रमशो बुधैः[9] ।
मातृका मन्त्रसहजैः जपहोमार्चनादिभिः ।। 7

---

1. अम्वरीषः - B. 2. मन्त्रस्य - B, 3. B पाठः, गायत्रं - A C, 4. G पाठः, वर्णेन्दी - A, वर्णेन्दि - B, 5. B पाठः, रभिष्टे - A C, 6. षट्क्रमारभेत् - F, षट्कृतो भवेत् - G 7. पुरस्सरः - B G H, 8. G पाठः, हदि शिखश्शिखानेत्रं - A B, 9. भवेत् - H.

अन्वयव्यतिरेकेण जयं हि परविद्यया ।
अगण्यं फलमाप्नोति सिद्धारिं नैव[1]शोधनम् ।। 8

पुनरावर्तयेत्तस्य भोगमोक्षविधा भवेत्* ।
मातृकाक्षर विन्यस्यै(स्ये?)दङ्गषट्कं तथैव च ।। 9

सशिरो मस्तकं श्रोत्रं नेत्रनासास्यकं क्रमात् ।
कण्ठहृन्नाभिगुह्यं च जानुःपद्भ्यां च षट्क्रमात् ।।10

कुक्षिः[2] पार्श्वे च वपरे[3] पी(पि?)ठरे आसनेङ्गषट् ।
पाणिपादतलेष्वस्त्रमङ्गुलीषु तथैव च ।। 11

मूर्धादि पादपर्यन्तं मन्त्राक्षरं न्यसेत्पृथक् ।
बाहुभ्यां[4] पादसन्धौ च मन्त्राक्षरं पृथक् पृथक् ।। 12

उभयोः पाण्यङ्गुलीनां मन्त्रषट्कं पृथक् पृथक् ।
नमोऽन्ताय महोन्ताय द्वौ[5] दक्षिणतले न्यसेत् ।। 13

ज्वालायमोह(महो?)ज्वालाय ऐतैस्तद्वत्त्रिभिस्त्रिभिः ।
शक्तिबीजे[6]न्यसेच्चैवमङ्गान्सर्वान्पृथक् पृथक् ।। 14

शिरो वामभुजो जानु पादाङ्गुष्ठौ च जानुनोः ।
मन्त्राङ्गषट्कं[7] विन्यस्य [8]चक्राकारसबुद्धिमान् ।। 15

---

1. चैव - H, * <u>नवमश्लोकस्य पूर्वार्धानन्तरं विद्यमानविषयः</u> - बीजशक्ति करतले अङ्गं सर्वं तथैव च - H, 2. कुक्षि - B, 3. G पाठः, पार्श्वोपपरे - A B, परे वीरैः - H, 4. C पाठः, बाह्यां - A B, 5. C पाठः, द्वे - A B, 6. C पाठः, बीजं - B G, 7. B पाठः, षट्कौ - A C E G, 8. चक्राकारेण - G H.

पुरुषशब्दं चतुर्थ्यन्तममर्षणविराम च ।
स्वाहा ऐन्द्रीं[1] दिशोद्धृत्य चक्रेण सहबन्धनम् ।। 16

ओं नमश्चक्र[2]राजाय हुं फट् स्वाहां तथैव[3] च ।
याम्यवारुणसौम्यं च अग्निनैर्ऋतवायवम् ।। 17

ऐशान्यमूर्ध्वाधस्ताच्च आत्मनेपदपूर्वकम् ।
आत्ममेपदमुद्धृत्य परस्मैपदमित्यति ।। 18

सर्वतो दिशमुद्धृत्य चक्रेण तदनन्तरम् ।
सह बध्नामि ते चैवं[4] चक्रैकादशमूर्तयः ।। 19

उभौ करतलौ योज्यमङ्गुष्ठौ तर्जनीं तथा ।
बध्नीयाद्वामकानिष्ट्यै[5] दक्षिणाङ्गुलिकं न्यसेत् ।। 20

मध्यमानामिकवामे बध्नीयाद्दक्षिणे तथा ।
उभयाङ्गुष्ठतर्जन्यौ विन्यसेत्तु[6] दिशो दश ।। 21

वीरभद्रे[7]ति विज्ञेया [8]न्यस्यैकादशमूर्तयः ।
द्वाविंशश्चक्रमूर्तिर्वा[9] [10]चतुश्चत्वार एव वा[11] ।। 22

अङ्गन्यासं पुरस्कृत्वा[12] मातृकामन्त्रयोजकम् ।
देहाङ्गन्यास[13] कृत्वाथ प्रत्यक्षरमनन्तरम् ।। 23

---

1. C पाठः, दिशोशृत्य - A B, 2. B पाठः, चक्राय - A C, 3. B पाठः, स्वाहान्तं च - A, स्वाहान्तमेव - H, 4. पञ्च - H, 5. B पाठः, कनिष्ट्ये - A C, कनिष्ठ्यन्तं - H, 6. C पाठः, विन्यसेस्तु - A B E, 7. मुद्रे -B, 8. C पाठः, न्यस्ये - A B, 9. B पाठः, मूर्ती वा - A, 10. चत्व - B, 11. B पाठः, - om in A, 12. same & कृत्य - F, 13. देहाङ्गं न्यास - E F, न्यासं - G H.

शक्तिबीजाक्षरं न्यस्य [करन्यासं तथैव च ।
अङ्गान् षट्कोणविन्यस्य मूलमन्त्रं तथैव च ॥

चक्राकारं न्यसेत्पश्चाद्दशदिग्बन्धनं तथा ।
ततः प्रणवकं न्यस्येत्]* शिरमध्ये तु वर्णगम्[1] ।

सितपीता रक्तवर्णा ऋषिःब्रह्मपितामहः ॥ 24

[2]गायत्रं छन्द इत्याहुः परमात्मा च देवता ।
मध्यमाङ्गुलिना न्यस्य इतराङ्गुलिकं विना[3] ॥ 25

सकारं विद्युद्वर्णाभं ऋषिःकण्वमनुष्टुभम् ।
छन्दोव(वा?)काशदैवत्यमाकाश[4]तत्त्वकं भवेत् ॥ 26

अङ्गुष्ठानामिकाभ्यां तु नासाग्रे विन्यसेद्बुधः ।
[5]द्वितीयं [6]शक्रगोपाख्यं ऋषिर्व्यासश्च[7] तु(त्रि?)ष्टुभम्[8] ॥

वायुदैवत्यतत्वानि वायुक्षेत्रं तथैव च ।
पञ्चाङ्गुलिभिरास्ये तु विन्यसेच्चैव बुद्धिमान् ॥ 28

तृतीयं नारदऋषिः विराट्छन्दे[9]ऽन्द्रदैवतम् ।
चक्र(शक्र?)गोप[10]निभं वर्णं पृथिवीतत्वमैक्षत ॥ 29

तर्जन्यङ्गुष्ठिकाभ्यां[11] तु हृदयो विन्यसेद्बुधः ।
चतुर्थमग्निवर्णाभं ऋषिःकौशिकत्रिष्टुभम् ॥ 30

---

* G मातृकायां विद्यमानो विषयः, 1. मध्येन्दु –E शिरमध्ये सुवर्णभं – G, 2. गायत्री – G, 3. तथा – H, 4. दैवत्यमाकाशं – E G, 5. C पाठः, द्वितीय – B. 6. चक्र – B, 7. B पाठः, वासश्च – A, 8. नुष्टुभं – C, 9. चन्द्रे – B, 10. कोप – B, 11. तर्जन्याङ्गुष्टिकाभ्यां – E F.

अग्निदैवत्य तत्वाच्च नाभेःपञ्चाङ्गुलीन्[1]न्यसेत् ।
पञ्चमं स्फटिकवर्णाभमापो दैवत्य तत्व[2] च ॥ 31

क्षेत्रमापो ऋषिर्व्यासस्त्रिष्टुभ[3]छन्द एव च ।
अङ्गुष्ठे गुह्यदेशेषु न्यसेत्तच्चैव बुद्धिमान् ॥ 32

[4]षष्ठमक्षरकं पीतं छन्दोऽनुष्टुभमेव च ।
ऋषिर्व्यासोऽग्निदैवत्यं तस्य [5]क्षेत्रस्य तत्व च ॥ 33

अङ्गुष्ठानामिकाभ्यां तु नासाग्रे विन्यसेद्बुधः ।
सप्तमं प्रथमवर्णाभमृषिः कण्वमनुष्टुभम् ॥ 34

छन्दोऽग्निदैवतं चापि क्षेत्रतत्वांश्च[6] शून्यकम् ।
पञ्चाङ्गुलीभिः पादाभ्यां विन्यसेच्चैव बुद्धिमान् ॥ 35

एवं न्यासविधिं कुर्यान्मन्त्रराजं[7] सकृत्स्मरेत् ।
सकृदुच्चार्यते मन्त्रं सहस्रगुणितं भवेत् ॥ 36

षडङ्गं [8]केवलं न्यस्य जपमेकगुणं भवेत् ।
षडङ्गस्याङ्गुष्ठ(ङ्गाङ्गुष्ठस ?)हितं[9] विन्यसेद्धृतिमूर्ध्नि च ॥ 37

मुष्टीकृताङ्गुष्टिकया शिखस्थानेषु विन्यसेत् ।
अनामिकाभ्यां नेत्राय पाणिभ्यां कवचं न्यसेत् ॥ 38

---

1. पञ्चाङ्गुलि – B, पञ्जाङ्गुली – E F, 2. मेव – H, 3. C पाठः, स्मृष्टुभिः – B, 4. विष्ठ – B, 5. B पाठः, क्षेत्र च – A C H, 6. तत्वं च – H, 7. यज्ञं – F, 8. G पाठः, वैकलं – A, 9. सहितं – G.

[1]अंसादारभ्य सर्वाङ्गमापादान्ताभिमर्शनम्[2] ।
अस्त्रमङ्गुष्ठतर्जन्यां विन्यसेद्दशदिक्षु च ॥ 39

वामपाणि[3]बहिश्चान्यमन्योन्याङ्गुलिसंस्पृशेत् ।
कनिष्ठिकाङ्गुलिदक्षिण्यं वामाङ्गुलिकसंयुजेत् ॥ 40

वामे कनिष्ठिकाङ्गुल्यं दक्षिणाङ्गुष्ठसंस्पृशेत्[4] ।
चक्रमुद्रेति विख्यातं चक्राकारेति[5] [6]दक्षिणम् ॥ 41

नमश्चक्राय विद्महे सहस्रज्वालाय धीमहि ।
तन्नो निवारिकश्चैव प्रचोदयादिति सूच्यते ॥ 42

चक्र[7]गायत्रमित्याहुः दक्षिणं परितस्त्रिभिः ॥ 43

सुदर्शनाय विद्महे हेतिराजाय धीमहि ।
तन्नो दीप्तःप्रचोदया[8]त्तत्सुदर्शनमेव च ॥ 44

चक्रसुदर्शनगायत्र्यौ[9] सव्यासव्यस्त्रिभिस्त्रिभिः ।
चक्राकारौ निकामिस्यादापादतलमस्तकम् ॥ 45

मन्त्राङ्गषट्कं प्रथमे द्वितीये[10] मन्त्रमातृकौ ।
तृतीयमङ्गषट्कं स्यात्पाणिपादौ च सन्धिषु ॥ 46

करन्यासं चतुर्थं स्यान्मन्त्रैकाक्षरपञ्चकम् ।
षष्ठन्यसेच्छक्तिबीजौ[11] षट्कोणं मध्यमं तथा ॥ 47

---

1. B पाठः, हंसात् - A C E, 2. G पाठः, मर्शकं - A C F, 3. F पाठः, बहु - B, 4. मेव च - H, 5. कारेक - B, 6. दक्षिणे - H, 7. C पाठः, गायत्रिरित्याहुः - E F, गायत्रिमित्याहुः - G, 8. F पाठः, तत् om in A B C G, 9. B पाठः, त्रौ - A F G, 10. द्वितीयं - G, 11. बीजैः - H.

मन्त्राङ्गमन्त्रौ विन्यस्य अष्टमेषु तथैव च ।
नवमम(मे?)ङ्गुलि[1]विन्यस्य दशमे दिशिबन्धनम् ।।48

[2]एकादशीं चक्रमुद्रामग्निप्रकारद्वादशीम् ।
एवं न्यासविधिं कृत्वा साक्षान्नारायणो भवेत् ।। 49

ज्योतिर्मयी तनुस्तत्र यावत्किञ्चिन्न भासयेत् ।
जपहोमार्चनैस्स्तोत्रैः कर्मकाले तथैव च ।। 50

सङ्ग्रामे शयनेऽरम्ये[3](रण्ये?)व्यवहारे सभासु[4] च ।
सर्वेषां विजयं रक्षां मन्त्रन्यासपरो भवेत् ।। 51

इति श्रीपाञ्चरात्रे विहगेन्द्रसंहितायां तन्त्ररहस्ये
अगस्त्यप्रोक्ते श्रीसुदर्शनकल्पे
मन्त्रन्यास[5]विधिर्नाम
एकादशःपटलः ।



---

1. नवममङ्गुलि – G. नवमाङ्गुलि – H, 2. C पाठः, एकादशी – B, एकादशं – G, 3. रम्ये – F, गम्ये – H, 4. G पाठः, सहेषु – A B H, 5. C पाठः, विधानौ – B, विधानो – G H.

द्वादशःपटलः

अम्बरीष उवाच[1] -

नमो मुनिवरस्तस्मै कुम्भयोने महाप्रभो ।
कथ्यतां भूतशुद्धिस्स्याच्छ्रोतुं कौतूहलं हि मे ॥ 1

अगस्त्य उवाच -

भूतात्मशुद्धिदं प्रोक्तं शोषणादीनि कारयेत् ।
अन्तर्बहिश्च शुद्धिस्स्यात्सप्राणायाम उच्यते ॥ 2

पर्वताग्रे नदीतीरे गोष्ठे देवालयेषु[2] च ।
विष्णुवालये प्रत्यङ्मुखे नदीं पश्चिमवाहिनीम् ॥ 3

बिल्वाम्रवटमूले वा अश्वत्थे वह्निमेव च ।
निर्मनुष्ये [3]महाटव्यमारामे मन्दिरेऽपि च ॥ 4

पाटलं चम्पकं[4] वाथ केतकीमल्लिकादिषु ।
अशोकवकुलं[5] चैव सौगन्धिद्रुममूलके ॥ 5

कदली[6]नालिकेरं च पूगाटव्ये पलाशके ।
ज्योतिष्मतीं वा प्लक्षं वा यत्र वा रोचितं[7] मनः ॥ 6

शुचौ समानदेशेऽथ गोमयेनोपलेपिते[8] ।
स्नातश्शुक्लाम्बरधरो सपवित्रोर्ध्व पुण्ड्रकः ॥ 7

कुशां चेलाजिनो वाथ [9]दारुजान्यासनानि च ।
कम्बलान् व्याघ्रचर्मान्वा आसनानि[10] च कल्पयेत् ॥8

---

1. अम्बरीषः -B G, 2. B पाठः, देवादयेदु - A, 3. C पाठः, महाटव्ये - A B G 4. B पाठः, पद्मकं - A, 5. B पाठः, बकुलं - A F, 6. B पाठः, गदली - A, 7. रोपितं - H, 8. C पाठः, लिप्यके - B, लिप्यते - G, 9. कुशं च लाजिनं - C, 10. C पाठः, दारुजाप्या - A B G, 11. चर्मान्वाग्रासनानि - G.

स्वस्तिकं पद्मभद्रं वा वीरं गोमुखमेव वा[1] ।
भूतात्मशुद्धितं प्रोक्तं शोषणादीनि कारयेत् ।। 9

मयूरं कुक्कुटं चापि आसीनस्सुसमाहितः ।
गुरुपादारविन्दाभ्यां प्रणामं दण्डवद्भुवि ।। 10

प्राङ्मुखोदङ्मुखो वापि समाहितमना[2] भवेत् ।
सशरायेति शार्ङ्गाय नाराचाय पदं वदेत् ।। 11

हुं फट् सुदर्शनायेति स्वाहान्तं तदनन्तरम् ।
आत्मानं दक्षिणे सव्ये चक्रशङ्खमनुस्मरेत् ।। 12

[3]ध्यायेन्नारायणं देवं रक्तवर्णं त्रिलोचनम् ।
चक्रमण्डलमध्यस्थं महाकायं महाभुजम् ।। 13

मकुटाग्रे[4] रथाङ्गस्यात्सुरप्रहरणोद्यतम् ।
अभयं दक्षिणे वामे वरदं[5] द्विभुजश्च सः ।। 14

अब्जखड्गं ततो धर्त्तुं[6] चतुर्भुजमिति स्मृतम्[7] ।
पद्मामुशं च मुसलं चक्रं दक्षिणमेव वा[8] ।। 15

शङ्खकौमोदकी पाशं चापस्यादष्टबाहवः ।
प्रदीप्तादित्यकोटीभिः एकोद्योगैरुदीरितम्[9] ।। 16

---

1. B पाठः, च – A, 2. मनो – B G, 3. H पाठः, ध्यायन् – A, 4. मकुटाय – C, 5. E पाठः, वरद – A B, 6. ततोद्धर्तु – E, च तोयत्वं – B, ततो धर्म H, 7. स्मृता – G, 8. च – H, 9. उदीर्यतां – B G

ज्वालामालासमावृत्य ज्वालेन ज्वालमुद्भवम् ।
उद्भूतज्वालसप्तार्चिः पूरयन्तं नभस्थले[1] ।। 17

एवं देवं ततो ध्यात्वा गुरुपारम्परं स्मरेत् ।
गुरुमूर्ध्नि पदेन्यस्य जीवात्म[2]परमात्मनोः ।। 18

संहारक्रमशो पश्चात्पार्थिवमम्भसे[3] गतः ।
अप्सुमग्ने लयी[4]भूत्वा अग्निं वायोर्गतं भवेत् ।। 19

वायुर्नभस्थले गत्वा साक्षरेणेह बुद्धिमान् ।
नाभिदेशं ततो स्मृत्वा वायुं मूर्ध्निगतं[5] तथा ।। 20

षट्कोणं बिन्दुसञ्चिन्त्य वायुबीजमनुस्मरेत् ।
वायुबीजस्य[6] किष्किन्धो ऋषिर्बृहतिछन्दसः ।। 21

वायुदेवत्ययं प्रोक्तमस्मद्वामनकाययोः ।
कृतान्तकरणं सर्वत्र पुरुषःशुष्ककल्मषः ।। 22

चक्रसुदर्शनगायत्रीं यथाशक्तिं जपेद्बुधः ।
पूरकं दक्षिणे नासापुटे आयाम[7]कुम्भकम् ।। 23

वामेन रेचकं चैव शोषणस्य क्रमेण हि ।
हृदये अग्निबीजं स्यात्त्रिकोणं रक्तवर्णकम् ।। 24

---

1. नगस्थले – B, 2. जीवात्मा – G, 3. G पाठः, महसे – A B, 4. B पाठः, लये – A E, 5. G पाठः, धूम्रनिभं – A B H, 6. बीजं स – B, 7. G पाठः, आयास – A B,

लाञ्छनं स्वस्तिकं त्रिस्यादग्निबीजमनुस्मरेत् ।
अग्निबीजस्य ऋषिःछन्दो गायत्रं[1] काश्यपोच्यते ॥ 25

अग्निर्देवत*रं[2] बीजं मनोवाक्कायत्रैविधम् ।
कल्मषस्सकलं दग्धो[3] यथाशक्तिमनुस्मरेत् ॥ 26

वामेन पूरकं चैव कुम्भकं रेचकेऽतरे ।
नासिका दक्षिणपुटे चक्रे सौदर्शनं[4] स्मरेत् ॥ 27

दहनं कारयेद्देहमन्तर्बाह्ये च शुद्धितम् ।
मूर्ध्नि देशे स्मरेद्बीजममृतं सोममण्डलम् ॥ 28

श्वेतवर्णार्धचन्द्रं स्यादत्वतिं(ग्निं?)लाञ्छनमेव च ।
अमृतबीजस्य हंसऋषिः(हंसर्षिः?)परमहंसोऽत्र देवता[5] ॥

मार्गछन्दो वकारस्य[6] मनोवाक्कायकारणम् ।
क्षालितोऽन्तर्बहिस्यातां [7]प्लावनोऽमृतभावयेत् ॥ 30

भगवत्पादाम्बुजे वामे अङ्गुष्ठाग्रे विनिःस्मृतः[8] ।
तेनामृतस्य धारेण अन्तर्बाह्यश्शुभं भवेत् ॥ 31

दक्षिणे पूरकं चैव इतरे पूर्ववद्भवेत् ।
ब्रह्मादि[9] पूरको ज्ञेयं कुम्भको[10] विष्णुरुच्यते ॥ 32

---

1. गायत्रीं – B, 2. देवता – G *पञ्चमाक्षरत्वात् 'देवत' इति प्रयोगः दृश्यते, 3. दण्डा – B, 4. शौदर्शन – C 5. अमृतबीजस्य ऋषिः पद्महंसोऽत्र देवता – in H, 6. पकारस्य – B, 7. प्रावणो – B, 8. B पाठः, विनिसृतः – A, 9. पूर्वादि – G, 10. कुम्भके – H.

रेचकश्शम्भुरित्याहुः सृष्टिस्थितिलयक्रमात् ।
ततो नारायणं देवं शङ्खचक्रगदाधरम् ॥ 33

आकाशाद्वायुः वायोरग्निरग्नेरापस्ततो भुवि ।
पृथिवी रत्नमात्मानमात्मने[1](नः ?)परमात्मनः ॥ 34

एवं क्रमेण आवाह्य पश्चाच्चक्रेश्वरं विभुम् ।
आचार्यपादयोः स्मृत्वा परमाचार्यमेव च ॥ 35

नित्यमभ्यासयेद्विद्वान्प्राणायामं च षोडशम् ।
एकोत्तरविवृद्धिः[2]स्यात्प्राणायामं दिने दिने ॥ 36

भूयो वक्ष्यामि राजेन्द्र योगिनां योगमुत्तमम् ।
वेदशास्त्रपुराणानां निर्णीतं च रहस्यकम् ॥ 37

इडा पिङ्गल*सुषुम्ना[3] वामदक्षिणमध्यगाम् ।
नाभिरारभ्य मुख्यान्तमूर्ध्नि[4] त्रिःस्याद्दशत्रयम् ॥ 38

पार्श्वे तिर्यक्चतुर्नाडी[5] दशनाडीह[6] कथ्यते ।
दशनाडीसमारभ्य द्विसप्ततिसहस्रकम् ॥ 39

क्षुद्रनाडीतिसम्बन्धं जीर्णपिप्पलपत्रवत् ।
त्वक्चर्ममांसमेधोऽस्थिशुक्लरक्तेति[7] सप्तधा ॥ 40

---

1. आत्मनो – B G, 2. बुद्धिः – B, 3. C पाठः, *सुषुम्ना च इत्यधिकाक्षरपाठः A, B मातृकयोः दृश्यते । 4. H पाठः, ऊर्ध्वं – A C E F, मूर्धान्तमूर्ध्वं – H, 5. G पाठः, नाडीक – A B, 6. नाडी तु – H, 7. सुक्तेति – B.

एवं संवृतकं देहं षण्णवत्यङ्गुलीयकम्[1] ।
प्राणापानसमानश्च उदानव्यानौ च वायवः ॥ 41

नागः कूर्मकृकारश्च[2] देवदत्तो धनञ्जयः* ।
वैराम्भमुख्यकश्चैव अन्तर्यामप्रपञ्चनाः ॥ 42

एवं वायुचतुर्दश्यां विकारं विविधं भवेत् ।
[3]नाभीमूलोर्ध्वकं पद्मनालं चेति दशाङ्गुलम्[4] ॥ 43

अधोमुखं तु हृत्पद्मं प्रणवेनोत्थितं भवेत् ।
व्याहृत्या विकसेत्पद्मं तन्मध्ये कर्णिका भवेत् ॥ 44

कर्णिका मध्यतो पीठं नानारत्नमयैश्शुभैः ।
पीठमध्ये स्थितं देवं नारायणमनामयम् ॥ 45

श्रीवत्सकौस्तुभोरस्कं पुण्डरीकायतेक्षणम् ।
शङ्खचक्रगदापद्मं मुसलं खड्गमेव च ॥ 46

धनुश्च वनमाला च अष्टबाहुं त्रिलोचनम् ।
सवाहनं स शक्तिं च सपरीवारसंवृतः ॥ 47

सब्रह्मा सशिवस्सेन्द्रस्सोऽक्षरःपरमस्वराट् ।
शुद्धं सूक्ष्मं निराकारं निर्विकारं निरञ्जनम् ॥ 48

---

1. B पाठः, स्वयं - A C H, त्यङ्गुलस्वयं - G. 2. H पाठः, नागः कूर्मश्च कृकारः - A, * V. No. 42 पूर्वार्धानन्तरं विद्यमानो विषयः - ततो नारायणं देवं शङ्खचक्रगदाधरं - H, 3. नाभि-H, 4. मूलोर्ध्वगं पद्म नालं च त्रिदशाङ्गुलं - G.

अप्रमेयमजं देवं तं विद्यात्पुरुषोत्तमम् ।
तस्य रूपं सदा ध्येयं योगिभिर्मुनिभिस्तदा ।। 49

सुषुम्ना नाडिका यस्य पञ्चवर्णेति पञ्चधा ।
चतुर्दिक्षुचतुर्नाडी मध्यनाडी समावृतः[1](ता?) ।। 50

वीणा नाडी च[2] संरब्धा[3]ब्रह्मरन्ध्रवासनकम् ।
दक्षिणं श्रवणं नेत्रं पाश्चिमं सन्निधान्तकम्[4] ।। 51

वामनेत्रध्रुवं[5](भ्रुवं?)चैव पूर्णमस्तकमेव च ।
इडा च वामनासान्तं पिङ्गला दक्षिणे पुटम् ।। 52

[6]अधोत्तरा च नाडीनां शृफलाबद्धसंयुताम्[7] ।
अपानाद्वायुमाकृष्य हृदयेति [8]पुटस्थितम् ।। 53

[9]सुषुम्नमध्यनाडी तु [10]वेणुसुषिरको भवेत् ।
मूलाधारेऽग्निमुज्वाल्य ब्रह्मरन्ध्रावसानकम् ।। 54

शतपत्रमथो[11] मुख्यं तन्मध्येऽमृतमण्डलम् ।
मूलाग्निं मण्डलान्तस्थं भावयेच्छंस्कृतो[12]ऽमृतम् ।। 55

हृत्पुण्डरीकचक्रेशं तस्याधारेण सेचयेत् ।
सदाभ्यास[13]परो नित्यं सर्वबन्धात्प्रमुच्यते ।। 56

---

1. समापितः – H, 2. वा – H, 3. संरब्ध्वा – H, 4. H पाठः, सन्निपातकं – A, 5. G पाठः, श्रवं – H, 6. अधरो – H, 7. बन्धसंयुतः – H, 8. पुटं – H, 9. सुषुम्ना – H, 10. बेरः – H, 11. तथो – B, 12. B पाठः, स्मृतो – A C F G H, 13. ऽमृतः – H, 14. न्यास – B.

सुषुम्ना नाडिका यस्य षडाधारेति पत्रकम् ।
इडापिङ्गलनाडीभ्यां व्यत्यासेति परस्परम् ॥ 57

नाडीत्रयेति सम्बन्धमाधारं पत्रकं भवेत् ।
सोमसूर्याग्निना बुध्वा वामदक्षिणपृष्ठतः ॥ 58

अतिभोज्यमती[1]पानमतिनिद्रां च वर्जयेत् ।
अतिस्नानमतीभोगमति भाषां[2] विवर्जयेत् ॥ 59

इत्येवमभ्यसेद्विद्वान् योगानां विधिमुत्तमम्[3] ॥ 60

इति श्रीपाञ्चरात्रे विहगेन्द्रसंहितायां
तन्त्ररहस्ये अगस्त्यप्रोक्ते श्रीसुदर्शनकल्पे
प्राणायामविधानो[4] नाम
द्वादशःपटलः ।



1. मति – C G, 2. C पाठः, भाषं – A B, 3. G पाठः, अविमुत्तमं – A विमुत्तमं – B, विमुक्तिदं – C, 4. विधानौ – B, विधानं – C H.

1. प्रासः



2. मुद्गरः



3. परश्वथ(ध):




4. भिंडिपालः



5. तोमरः



6. मुसलम्



7. शातघ्नी



8. शंकुः





9. क्रकचः





10. क्षुरप्र(भ्रकम्)

11. नाराचः

12. पाशुपतप्रतिनिधिवंशचापः




13. शरः



14. इषुधिः


15. फलकम्



16. क्षेपिणी



17. रंभकम्



18. करवाळः




19. आरा



20. शंखिनी



21. चर्मिणि



22. प्रसेधिका



अनुबन्धविवरणम् - பின்னிணைப்பின் விளக்கம்

தஞ்சாவூர் சரசுவதி மகால் நூலகம் எண்ணற்ற பல்வேறு வகைச் சுவடிகளைத் தன்னகத்தே கொண்டு சிறந்து விளங்குகிறது. அவற்றுள் கலெக்ஷன் சுவடிகள் பல உள்ளன. ஸ்ரீ P. நடராஜ அய்யர் கலெக்ஷன் சுவடிகளுள் Mss. 5179 என்ற எண் கொண்ட சுவடி ஆயுதங்களின் ஓவியம் (आयुधानां चित्राणि) என்ற தலைப்பில் உள்ளது. இந்த தலைப்பிலமைந்த சுவடியில் மொத்தம் 22 ஆயுதங்களின் ஓவியமுள்ளது. அவற்றுள் ஸ்ரீசுதர்சன மூர்த்தியின் ஆயுதங்களாக (3) பரச்வதம் (4) பிண்டிபாலம் போன்றவை காணக்கிடைக்கின்றன. ஆய்வாளர்களுக்கு பயன் தரும் வகையில் ஓவியம் காட்டும் ஆயுதங்களின் பெயர்களை வரிசையாக இங்கே இணைக்கப்படுகிறது. 1. ப்ராஸம், 2. முத்கரம், 3. பரச்வதம், 4. பிண்டிபாலம், 5. தோமரம், 6. முஸலம், 7. சதக்னீ, 8. சங்கு, 9. கிரகசம், 10. க்ஷுரப்ரம், மற்றொருவகை, 11. நாராசம், 12. பாசுபத பிரதிநிதி வம்சசாபம், 13. சரம், 14. இஷுதி, 15. பலகம், 16. க்ஷேபிணீ, 17. ரம்பகம், 18. கரவாளம், 19. ஆரா, 20. சங்கினீ, 21. சர்மிணி, 22. பிரஸேதிகா என்பன.



सहायकग्रन्थसूची - துணைநூற்பட்டியல்

1. சதுர்விம்சதி மூர்த்தி லக்ஷணம்
பதிப்பாசிரியர்: ஆ. வீரராகவன்,
சரசுவதி மகால் நூலகம், தஞ்சாவூர்.
ஆண்டு: 2002

2. Samskrita Sahitya Vimarsa
By Dvijendranath Sastri
Bharathi Prathishtan
Mayarashtra Nagaram (Uttarapradesh)
year - 1956.

3. Catalogue of Pancharatra Samhitas
Editor: Sadhu Purushadas & Srutiprakasadas,
swami Narayan Aksharapeetam, Alahabad,
year-2002.

4. ஸ்ரீபாஞ்சராத்திர நூல் விளக்கம்
பதிப்பாசிரியர்: 1. Dr. H. D. Smith,
2. K. K. A. Venkatachary
சென்னை, ஆண்டு - 1967.

5. (RSB. 1 & 2) G & H Manuscript xerox copies.
அன்பளிப்பார்:
திருவெள்ளறை வா. இராமஸ்வாமி பட்டர்,
அறங்காவலர், ஸ்ரீபாஞ்சராத்திர ஆகம
பாதுகாப்பு அறக்கட்டளை
73, மேலச்சித்திரை வீதி, ஸ்ரீரங்கம், திருச்சி-6

6. லக்ஷ்மீ தந்த்ரம், முன்னுரை
அடையார் நூலக வெளியீடு, சென்னை.

7. ஆயுதங்களின் ஓவியம்
(Mss No. 5179) Sri P. Nataraja Iyer collection,
Sarasvati Mahal Library, Thanjavur.



ண்டுகோள்

கருணையுள்ளங்கொண்ட நம் முன்னோர்கள் அரிய பெரிய இலக்கியங்களையும், பிறவற்றையும் பனை ஓலைகளில் எழுதிச் சுவடிகளாக நமக்குத் தந்தனர். அவை பல்வேறு இடங்களில் முடங்கி உள்ளன. சுவடிகள் பழுதடைவதற்குமுன் சரசுவதி மகாலுக்கு அன்பளிப்பாகக் கொடுத்துதவினால், அவை மக்களுக்குப் பயன்படும்.

மகாலுக்குக் கொடுப்பதன் மூலம், சுவடி தந்தவர்களும், சுவடி எழுதியோரும் அழியாப்புகழை, பெருமைசால் சரசுவதி மகால் உள்ளளவும் பெறுவர். அவை பதிப்பாகி வருமாயின் சுவடி தந்தார் பெயர் இடம்பெறுவதோடு, அப்பதிப்பில் ஐந்து பிரதிகளும் பெறுவர்.

எனவே, நாம் பெற்ற பேறு பெறுக இவ்வையகம் என்ற எண்ணமுடைய நற்பண்பாளர்கள் தம்மிடமுள்ள சுவடிகளைச் சரசுவதி மகாலுக்குத் தந்துதவ வேண்டுகிறேன்.

தஞ்சாவூர்

மாவட்ட ஆட்சித்தலைவர்
மற்றும் இயக்குநர்
சரசுவதி மகால் நூலகம்.


சரசுவதி மகால் நூலக அச்சகம்